ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]

*A portal of Sarasvatniketanam*

## एकोनत्रिंशदङ्के भवतां सर्वेषां मङ्गलाभिनन्दनम्।




www.sarasvatniketanam.org , www.jahnavisanskritejournal.in


| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति-डा.सदानन्दझा |
| **पुनर्वीक्षकाः** | डा. पङ्कजमिश्रः, नई दिल्ली , डा. मखलेशकुमारः, पुरी , डा. वी बी ओझा, हिमाचलप्रदेशः, डा विद्वान्-सुमन-आचार्यः, चेन्नै, डा. गीताशुक्ला, लखीमपुरखीरी, डा. अनिलप्रतापगिरिः, पाण्डिच्चेरी, डा. जानकीशरण-आचार्यः, सोमनाथविश्वविद्यालयः, डा. मुकेशकुमारः, देवप्रयागः. |
| **विशिष्टपुनर्वीक्षकाः** | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka, डा. गिरिधारी-पण्डा, मिदनापुरम्, डा. ना. वैती सुब्रमणियन्, हिमाचलप्रदेशः. |
| **सम्पादकाः** | डा. वी बी ओझा, हिमाचलप्रदेशः, डा. रामसेवकझा, मधुबनी डा. नारायणदत्तः, नई दिल्ली, डा. श्लेषासचिन्द्र, नई दिल्ली, श्री श्रीनाथधरद्विवेदी, हिमाचलप्रदेशः, डा. बिपिनकुमारझा, हिमाचलप्रदेशः |
| **प्रकाशकः** | डा. बिपिनकुमारझा |
| **प्रकाशन-सम्पादनसहायकाः** | डा. हीरालालदासः, स्वीटीरानी, परिमलमण्डलः, देवव्रतनायकः, |
| **प्रतिनिधयः (लोकार्पणसन्दर्भे)** | डा विद्वान् सुमन-आचार्यः- डा विद्वान् सुनील-आचार्यश्च |
| **तकनीकिप्रवन्धनसहायकाः** | डा. सुमनदीक्षित, कानपुर , डा. सरिताश्रीवास्तव, लखनऊ , श्री सुमित-आनन्द, दरभंगा, रित्ज़ वेब होस्टिंग, बंगलोर। |


सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।



JAHNAVI-A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual (Sanskrit, Hindi & English) Journal.

## विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| I | प्रस्फुटम् | | |
| 1 | सम्पादकीयम् | विद्यावाचस्पतिः डा. सदानन्दझा | मुख्यसम्पादकः |
| 2 | प्रकाशकीयम् | डा. बिपिनकुमारझा | प्रकाशकः सम्पादकश्च |
| II.A | साहित्यानुरागः | | |
| 1 | कर्मविमर्शः | डा. केशवकुमाररायः ( प्र. प्राचार्यः) | लक्ष्मीदेवी शर्राफ-आदर्श-संस्कृतमहाविद्यालयः, कालीराखा, देवघर, झारखण्ड। |
| 2 | लब्धं नेत्रनिर्वाणम् | डा. पङ्कज मिश्र (एसोसिएट प्रोफेसर) | सेण्ट स्टीफेंस कालेज, दिल्लीविश्वविद्यालयः |
| 3 | Influence of Postmodernism in the Rasagangadhara | Nibedita Banerjee. (Research Scholar) Dr.AnilPratap Giri (Assistant Professor) | Dept. of Sanskrit, Pondicherry University |
| 4 | मनुस्मृति के आलोक में दण्ड-विधान | डा. गीताशुक्ला, (एसोसिएट प्रोफेसर) | संस्कृतविभाग , भ. दी. आ. क. स्नातकोत्तर महाविद्यालय, लखीमपुरखीरी, उत्तर-प्रदेश |
| 5 | पाणिनीयसूत्राणां तात्पर्यसाधने सन्निपातपरिभाषायाः प्रयोजनानि | डा. गिरिधारीपण्डा (सहायकाचार्यः) | स्नातकोत्तरसंस्कृतविभागः, मिदनापुरमहाविद्यालयः, मिदनापुरम्, पश्चिमबङ्गः |
| 6 | ज्योतिश्शास्त्रोक्तनाभसयोगविमर्शः | डा. मुकेशकुमारः, (सहायकाचार्यः) | राष्ट्रियसंस्कृतसंस्थानम्, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः |
| 7 | द्वे विद्ये वेदितव्ये | परिमलमण्डलः (शोधच्छात्रः) | संस्कृतविभाग-पाण्डिच्चेरीविश्वविद्यालयः |
| 8 | उपनिषदों में ओङ्कार की उपासना | श्री विवेकशर्मा (सहायकाचार्य) | हिमाचलप्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला |
| 9 | व्याकरणाध्ययनस्य प्रयोजनम् | डा रविनाथ शुक्ल | श्रीनिकेतनम्, अयोध्या, उत्तरप्रदेश |
| 10 | गौतमबुद्धदृष्ट्या दुःखनिरोधः | देबव्रतनाएकः डाँ.अनिलप्रतापगिरिश्च | संस्कृतविभागःपाण्डिच्चेरी-विश्वविद्यालयः |
| 11 | वेदेषु सूर्यविज्ञानम् | श्रीब्रजेशकुमारझा, (शोधच्छात्रः) | श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठम्, नवदेहली |
| 12 | भारते सुशासनप्रबन्धनपद्धतये संस्कृतभाषायाः योगदानम् | डा. हीरालालदाशः, (सहायकाचार्यः) | श्रीचन्द्रशेखरसंस्कृतविश्वमहाविद्यालयः, एनाथुर, कांचीपुरम्, तमिलनाडुः। |
| 13 | अभिज्ञानशाकुन्तलम् में वात्सल्य योजना | स्वीटी रानी, (शोधच्छात्रा) | वेदव्यास परिसर, बलाहर, हि.प्र. |
| 14 | ब्रह्मपुराणे भगवान् जगन्नाथः | डा. मखलेशकुमारः, (सहाचार्यः) | पुराणेतिहासविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि), श्रीसदाशिवपुरीपरिसरः, पुरी |
| 15 | मनोरमाशेखरदिशाकौमुदी-मङ्गलसमीक्षणम्। | श्री श्रीनाथधरद्विवेदी (प्राध्यापकः) | राष्ट्रियसंस्कृतसंस्थानम्, बलाहरः, हिमाचलप्रदेशः, वेदव्यासपरिसरः |
| 16 | Political aspects in Kalidasa’s Works | Amritava Das | Village & P.O - Atbati, District - East Midnapore, W.B, |

# प्रस्फुटम्





# सम्पादकीयम्



विद्यावाचस्पति डॉ. सदानन्द झा[1]

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदय कलुषपुञ्जं प्रक्षिपन्ती विदूरे
सघन तमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या जाह्नवी काऽपिधन्या॥

अये आध्यात्मिकगहनचिन्तकाः सुरसरस्वतीसमाराधनतत्परान्तःकरणा विद्वज्जनाः शास्त्रविचार-परिशीलनलब्धादरासहृदया सम्माननीयाः पाठकाः संस्कृतानुरागिणश्च!!

विश्वस्य प्रथमान्तर्जालीयान्ताराष्ट्रियसंस्कृतत्रैमासिक जाह्नव्याः पत्रिकायाः प्रकृतमिममेकोनत्रिंशदङ्कं सहृदयपाठकानां पुरतः समुपस्थापयन् मोमुद्यते मे मनः। सुरभारत्याः प्रचारप्रसार हेतवे जनवरी २०१० ख्रीस्ताब्दात् विशिष्टविदुषां करकमलाभ्यां लोकार्पणपरम्पराऽवच्छिन्ना प्रचलिता वर्तते। एतत्परम्परायां चतुर्थाङ्कस्य कार्यक्रमः संयुक्तराज्यामेरिकास्थिते अटलाण्टानगरेऽपि डा. दीनबन्धुचन्दौरामहाशयेन शतशोविदुषामुपस्थितौ सोल्लासं सम्पादितः इति तु जानन्त्येव शास्त्ररसिकाः।

एतत्क्रमे अस्मदीयपत्रिकाप्रस्तुताङ्कस्य लोकार्पणकार्यक्रमः तमिलनाडूस्थ कर्णाटकसङ्घप्रेक्षागृहे अस्माकं परमसौभाग्यवशात् विविधशास्त्रमर्मज्ञैः कृतभूरिपरिश्रमैः महामहिमराष्ट्राधीशसम्मानितैः डा. वी प्रभञ्जनाचार्यमहोदयैः विविधकार्यक्रमव्यस्तेनापि पत्रिकालोकार्पणकृते कृपानुमतिः प्रदत्तास्ति । एतदर्थं सश्रद्धं कार्तज्ञ्यं विनिवेदयति सकलजाह्नवीपरिवारः।

प्रतिस्पर्द्धात्मके युगे साम्प्रतं नैकाः संस्कृतपत्रिकाः विभिन्नराज्येभ्यः देशेभ्यः विदेशेभ्यश्च अन्तर्जालमाध्यमेन सञ्चालितास्सन्ति। यथा प्रख्यातविदुषा डा. बलदेवानन्दसागरमहाभागेन 'संस्कृतपत्रकारितेतिग्रन्थे सविवरणं समुदीरितमस्ति। किन्तु कृतभूरिपरिश्रमाणां विद्यावृद्धानामनारतशास्त्रचिन्तकानां स्व-स्वविषयमर्मज्ञानां विशिष्टविदुषां साहाय्येन नानाप्रान्तेभ्यः सम्प्रेषितपाण्डित्यपूर्णशोधनिबन्धान् प्राप्य धीरं प्रवहन्ती सहृदयमनांसि सिञ्चन्ती

---

[1] पत्रिकायाः मुख्यसम्पादकः।

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17
ISSN 0976-8645

अन्ताराष्ट्रियमानकपत्रिकाप्रतिष्ठां सम्प्राप्ता। विश्वविद्यालयानुदानायोगेनाप्यनुशंसिता च । अस्मदीयेयं पत्रिका नेदानीं यावत् प्रभाविता अपितु शुक्लपक्षीयचन्द्रवत् शनैः शनैः बर्द्धिता स्यादिति मन्ये।

प्रकृताङ्के नीरक्षीरविवेकिभिर्विद्वद्वरैरनुशंसितप्राप्ता आलेखाः पक्षपातशून्यमनसा पञ्चादशाधिकाः सङ्गुम्फिता। यत्र 'कर्मविमर्शः, लब्धं नेत्रनिर्वाणम्, मनुस्मृतौ दण्डविधानम्, उत्तर-आधुनिकतावादस्य रसगंगाधरे प्रभावः, भारतशासनपद्धतये संस्कृतभाषायाः योगदानम्, वेदेषु सूर्यविज्ञानम्, व्याकरणाध्ययनस्य प्रयोजनमित्यादयः शोधनिबन्धाः शास्त्ररसिकानां सहृदयपाठकानां विशेषेण मनांसि रमयिष्यन्तीति मे द्रढीयान् विश्वासः। समाहितेनापि पत्रिकायां क्वचिद्दोषो भवेत्तर्हि समाधेयो दोषज्ञैः। मुनयोपि भ्राम्यन्तीति का कथा अस्मादृशानां लोचनगोचराणाम्।

अन्ते सारस्वत-यज्ञे कृतभूरिपरिश्रमेभ्यः सकलजाह्नवीपरिवारेभ्यः सविनयं धन्यवादाः समर्प्यन्ते। आशाऽसे जाह्नवीवदेव जाह्नवी सुचिरं सर्वत्र प्रवहन्ती सहृदयजनमानसे शान्तिं सुखं सन्तोषं च प्रयच्छतादिति कामयमानः सादरं निवेद्य विरमत्ययं जनः।

श्रुतिध्वनिमनोहरा मधुरसा शुभा पावनी

स्मृताप्यतनुतापहृत् समवगाहसौख्यप्रदा।

निषेव्यपदपङ्कजा सुकृतमूर्तिमान्याऽमला

समस्तजगतीतले प्रवहतादियं जाह्नवी

विद्वच्चरणचञ्चरीकः

झोपारव्यः सदानन्दः

लखनौरम, विहारः

बुद्धपूर्णिमा



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17
ISSN 0976-8645

# प्रकाशकीयम्



डा. बिपिनकुमारझा[2]

यस्याः प्रभावमतुलं भगवाननन्तो,

ब्रह्माहरश्च नहि वक्तुमलं बलञ्च।

सा चण्डिकाऽखिलजगत्परिपालनाय,

नाशाय चाशुभभयस्य मतिं करोतु॥

सर्वोऽपि राष्ट्रसमुदायः इदानीं भारतवर्षस्य अप्रतिहतविकासगतिं विलोक्य आश्चर्यपारावारे निमग्नोऽस्ति। जी-एस-९ वाहकविमानस्य सफलप्रयोगेण को वा न देशः आश्चर्यमनुभवति । इमाः घटना भारतीयानां चेतः प्रसादयन्ति। किन्तु अस्मिन्नेव क्रमे काश्चन घटनाः हृदयं विदारयन्ति। यथा पाकिस्तानप्रेरिताः केचन भारतीयनवयुवानः मातृस्वरूपां भारतभूमिं तर्जयन्ति। भारतीयसैनिकैः साकम् अभद्रव्यवहारं कुर्वन्ति। स्वदारान् पुत्रान् पितॄन् परित्यज्य ये सैनिकयतयः केवलं देशसेवार्थं मातृभूमिरक्षणार्थं स्वप्राणान् अपि अविगणय्य भारतपरिधिं रक्षन्ति तान् प्रति एषः दुराग्रहः सर्वथा अनुचितः। सैनिकाः मनसापि आदरणीयाः। एवमेव सर्वकारेणापि सैनिकानां सर्वविधव्यवस्था इतोऽपि परिवर्द्धनीयाः। वस्तुतः ते सीम्नि अहर्निशं जागरणं कुर्वन्ति वयं च स्व-स्वसदने आनन्दपूर्वकं शयामहे। अत एव सैनिकाः यतयो भवन्ति । सा निशा सर्वभूतानां यस्यां जागर्ति संयमी।

अस्मिन्नेव क्रमे मुस्लिमसमाजे विद्यमाना 'तीन तलाक' नामधेया कुप्रथा मुस्लिमवनिताः पीडयन्ति। जन्मजन्मान्तरसम्बन्धः दम्पत्योः तलाक इति त्रिवारसमुच्चारणेनैव शिथलीभवति सहसा खण्डितो भवति। क्व गता यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता इति भारतीयपरम्परा। यद्यपि 'तीन तलाक' इति कुख्यातपरम्परां न सम्मानयन्ति मुस्लिमदेशाः। अनेके देशाः न ददति मान्यताम् अस्यै कुप्रथायै। भारतेऽपि एषा व्यवस्था आनेतव्या। यद्यपि भारतीमुस्लिमवनिताः अपि इमां व्यवस्थां भर्त्सयन्ति तथापि ये भोगवादिनो मुस्लिमपुरुषाः सन्ति ते समर्थयन्ति इमां परम्पराम्। मन्ये माननीयसर्वोच्चन्यायालयेन काऽपि सद्यः एव उत्तमा-व्यवस्था सम्पादयिष्यते।

---

[2] प्रकाशकः सम्पादकश्च

सम्प्रति UGC द्वारा प्रकाशितप्रामाणिकशोधपत्रिकाया: सूची इत्यत्र 38893 क्रमे जाह्नवीपत्रिकाया: क्रम: वर्तते। एतदर्थं हार्दान् धन्यवादान् प्रकटीकरोमि। इदानीञ्च ये विपश्चिदपश्चिमाः साक्षात् सम्पादने प्रकाशने पुनर्वीक्षणे च स्वपरिश्रममर्पितवन्त एतदर्थमेतेषां कृते भूयोभूयः कार्तज्ञं विभर्ति जाह्नवीपरिवारः। अन्ये ये केचन् उपकारकाः सन्ति तेषां कृते अपि नमोवाकं प्रशास्ति ।

दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात्
शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत्।

भवदीयः

बिपिनकुमारझा

बुद्धपूर्णिमा

बलाहरस्थ-वेदव्यासपरिसरः, हिमाचलप्रदेशः





# साहित्यानुरागः

# कर्मविमर्शः

डा. केशवकुमाररायः

[प्र. प्राचार्यः, लक्ष्मीदेवी शर्राफ-आदर्श-संस्कृतमहाविद्यालयः, कालीराखा, देवघर, झारखण्ड।]

अस्मिन् निबन्धे वाक्यपदीयस्य पदकाण्डाभिधतृतीयकाण्डे साधनसमुद्देशे 45, 46कारिकयोः पाणिनिव्याकरणसम्मतं यत् सप्तविधं कर्म प्रतिपादितं तेषां सप्तविधानामपि कर्मणां तात्त्विकं विवेचनं प्रस्तुतं वर्त्तते।

पाणिनीयव्याकरणे द्विविधः[1] कर्मशब्दो दृश्यते। एकः कृत्रिमो नाम संज्ञारूपः रूढ़ो वा पारिभाषिको वा। द्वितीयोऽकृत्रिमो नामस्वाभाविकः। कर्मशब्दस्य स्वभावतः लोके क्रियारूपार्थे प्रयोगो दृश्यते। साम्प्रतमत्र कृत्रिमस्य संज्ञारूपार्थे रूढस्य परिभाषिकस्य वा कर्मशब्दस्य विवेचनं प्रारभ्यते। पाणिनिना नियतेषु केषुचिदर्थेषु कर्मशब्दः परिभाषितो वर्त्तते। तेषु अत्र प्रथमं 'कर्त्तुरीप्सिततमं कर्म' इति सूत्रमधिकृत्य विचारः प्रारभ्यते। अस्मिन् वाक्यरूपे सूत्रे वर्त्तन्ते त्रीणि पदानि। कर्त्तुरिति षष्ठ्यन्तम्, ईप्सिततममिति प्रथमान्तं कर्म इति च प्रथमान्तम्। ईप्सिततममिति उद्देश्यम्, कर्म इति विधेयम्। कर्त्तुरित्यस्य उद्देश्यभूते ईप्सिततमपदार्थे विशेषणत्वम्।

अस्य वाक्यरूपस्य सूत्रस्य कोऽर्थ इति जायते जिज्ञासा। वाक्यार्थपदार्थज्ञानयोः कार्यकारणभावानुक्रोधेन वाक्यार्थज्ञानार्थं पदार्थज्ञानस्य आवश्यकतया प्रथमं सूत्रघटकीभूतानां पदानामर्थाः निरूप्यन्ते। तत्राऽपि ''नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते'' इति न्यायेन विशेषणीभूतः कर्तृपदार्थः सर्वप्रथमं जिज्ञासाविषयीभवति। तस्मात् ईप्सिततमरूपे पदार्थे विशेषणीभूतस्य कर्तृपदार्थस्य विचारः सर्वादौ प्रस्तूयते –

कृधातोस्तृचि प्रत्यये कृते कर्तृशब्दसिद्धिः। कृधात्वर्थः उत्पत्त्यनुकूलो व्यापारःतृच्प्रत्ययार्थश्च आश्रयः। एवं कर्तृइत्यनेन उत्पत्त्यनुकूल–व्यापाराश्रयो बोध्यते। परन्तु इष्टानुरोधेन उत्पत्तेरत्र अविवक्षा। अन्यथा घटं करोतीत्यत्रैव कर्मसंज्ञा स्यात् ग्रामं गच्छतीत्यत्र तु न स्यात् उत्पत्त्यनुकूलव्यापाराश्रयरूपकर्त्रा ग्रामस्य ईप्स्यमानत्वाभावात्। एतेन अत्र व्यापारमात्रं कृधात्वर्थः। कर्तृशब्दात् ''क्तस्य च वर्त्तमाने'' इति सूत्रेण कर्तरि षष्ठी। एवञ्च षष्ठ्यर्थः व्यापाराश्रयः। अत्र व्यापाराश्रयरूपप्रत्ययार्थमुद्दिश्य व्यापाराश्रयरूपप्रकृत्यर्थस्य विधानमसम्भवम्, उद्देश्यविधेययोरैक्यात्। तस्मादत्राऽपि इष्टानुरोधेन आश्रयमात्रं ङसर्थः व्यापारस्य अत्राविवक्षा। एतेन विधेयांशे किञ्चिदधिकावगाहिज्ञानसम्भावात् 'नीलघटो घट' – इतिवत् शाब्दबोधो भवति। तथा हि व्यापाराश्रयाऽभिन्नाश्रयः इति बोधः कर्त्तुरिति षष्ठ्यन्तात् जायते।





## ईप्सिततमपदार्थविमर्शः

ईप्सिततमघटक सन्नर्थे आप्धात्वर्थसम्बन्धस्य स्वप्रकारकत्वसम्बन्धेन अन्वयः।क्तार्थः विषयताश्रयः। सन्नर्थेच्छायाः निरूपितत्वसम्बन्धेन क्तप्रत्ययार्थैकदेशे विषयतायामन्वयः। तमबर्थः प्रकर्षः। स च प्रयोज्यत्वरूपः। एवञ्च व्यापाराश्रयाऽभिन्नाश्रयस्य स्ववृत्तित्वसम्बन्धेन सन्नर्थेच्छायामन्वयः। तथा च व्यापाराश्रयाऽभिन्नाश्रयवृत्ति–वर्त्तमानकालिकव्यापारविशिष्ट–फलाश्रयत्व–प्रकारकेच्छा–विषयताश्रयोऽर्थ : कर्म भवति। इच्छा–निरूपितविषयता हि उद्देश्यत्वरूपा। ईप्सितपदार्थे क्तप्रत्ययोपात्तवर्त्तमानत्वस्य अन्वयस्वीकारे कटमकरोत्, कटं करिष्यतीत्यादि प्रयोगाणां सिद्धि र्न स्यात्। एवमिष्टानुरोधेन अत्र क्तप्रत्ययोपात्तस्य वर्त्तमानत्वस्य नान्वयः। वर्त्तमानत्वस्य अन्वयाभावपक्षे ईप्सिततमत्वमत्र व्यापाराश्रयाभिन्नाश्रयवृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारकेच्छाविषयताश्रयोऽर्थः कर्म भवति।

अस्मिन् सूत्रे उद्देश्यरूपे ईप्सिततमपदार्थे कर्त्तुरिति विशेषणं माऽस्तु। ईप्सितमं कर्म इत्येतावदेव सूत्रमस्तु। एवं केन आप्तुमिष्टतममिति जिज्ञासायां कारकाधिकारस्य प्रकृत्त्वाद् व्यापारेणेति[3] लप्स्यते। एवञच कारकतृत्तिव्यापारविशिष्टफलाश्रयत्वप्रकारकेच्छाविषयताश्रयोऽर्थः कर्म इत्यर्थेन सकलेष्टसिद्धौ सूत्रे कर्तृग्रहणं व्यर्थमेवेति वाक्तुमशक्यम्। 'माषेषु अश्वं बध्नाती'ति वाक्ये अत्र भक्षणक्रियाकर्त्तुरश्वस्य इच्छा वर्त्तते 'भाषाःमे गलविलाधःसंयोगश्रयाः भवन्तु'' इति, क्षेत्राधिपतिस्तु भाषभक्षणार्थं प्रवृत्तमश्वं माषनाशो मा भूदिति एतदर्थ क्षेत्रादन्यत्र रज्जुशङकुसंयोगाश्रयं सम्पादयति। एवञ्च कर्त्तुरितिपदमीप्सिततमविशेषणार्थमावश्यकम्। एवं कर्त्तृग्रहणे कृतेऽपि भक्षणक्रिया कर्त्तृत्वस्य अश्वे सत्त्वात् माषाणां कर्मत्वापत्तिस्तदवस्थैवेति वक्तुं नैव शक्यते। अत्र सूत्रे कर्त्तृग्रहणसामर्थ्यात् प्रकृतधात्वर्थक्रिया–निरूपितकर्त्तृत्वस्य ग्रहणेन दोषाभावात्।

अत्र सूत्रे यदि ईप्सिततमग्रहणं नैव क्रियते तर्हि सूत्रस्यास्येदं स्वरूपं भवति 'कर्त्तुरुद्देश्यं कर्म' इति यावत्। तदर्थः कर्त्तृवृत्तीच्छीयोद्देश्यताश्रयः कर्म। तेन 'कृतभोजनोऽपि पयोलाभेन ओदनभोजने प्रवर्त्तते' इत्यर्थके 'पयसा ओदनं भुङक्ते' इति वाक्ये पयसोऽपि कर्मत्वं स्यात् यत्किंचत् प्रकारकेच्छोद्देश्यस्य कर्मत्वात्। तथा हि पयोलाभनिरूपितविषयताश्रयो भवतु इत्यत्र पयसि विशेष्यता, लाभनिरूपितविषयतायां प्रकारता इति पयसः कर्मत्वं दुर्वारम्। कृते तु ईप्सिततमग्रहणे फलाश्रयत्वप्रकारकेच्छीद्देश्यस्यैव कर्मत्वेन पयसो यत् किंचित् प्रकारकेच्छोद्देश्यत्वेऽपि फलाश्रयत्वप्रकारकेच्छोद्देश्यत्वाभावात् न दोषः।

**तमब्ग्रहणस्य प्रयोजनम्**

यद्यपि पूर्वमीप्सिततमग्रहणस्य फलं प्रतिपादितम्। वस्तुतस्तु तत् केवलमीप्सितग्रहणस्यैव फलम्। तमब्ग्रहणेन तु प्रयोज्यत्वलाभः। पयसा ओदनं भुंक्ते इत्यत्र तु प्रयोज्यत्वाऽभावेऽपि ईप्सितग्रहणलब्धव्यापारवाचकधातुवच्यत्वमित्येतावतैव पयसः कर्मत्ववारणं सम्भवति। एवं तमपा लब्धं प्रयोज्यत्वम् अत्र साक्षात् परम्परया वा जन्यत्वमेव। तमबभावे तु यत्र यत्र वारणार्थानामीप्सित इति सूत्रस्य प्राप्तिः तत्र सर्वत्र कर्तुरित्यादि सूत्रस्य प्राप्तिसत्त्वात् ''येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीतिन्यायेन अनवकाशः, वारणार्थानाम् इति सूत्रम् अपवादः स्यात्। यतो हि तमबभावे व्यापारवाचकधातुवाच्य फलाश्रयत्वेन इच्छीयोद्देश्यताश्रयत्वं यथा माणवकस्य अस्ति तथैव अग्नेरपि। तथा हि वारिधातोः फलद्वयमस्ति। एकं संयोगरूपम्, अपरञ्च संयोगानुकूलव्यापाराभावरूपम्। माणवक इच्छति अग्निर्मन्निष्ठव्यापारजन्यसंयोगाश्रयो भवतु इति। माता चेच्छति माणवको मन्नष्ठव्यापारजन्यसंयोगानुकूलव्यापाराभावाश्रयो भवतु इति।

एतावता यथा अग्नेरपादानत्वम्, तथैव माणवकस्याऽपि प्रसज्येत। अत एव तमब्ग्रहणं माणवकस्यापादानसंज्ञावारणाय सर्वथा आवश्यकम्। तल्लभ्य प्रयोज्यरूपश्चात्र प्रकर्षः। तेन कर्त्तृवृत्तिव्यापारप्रयोज्यव्यापारवाचकधातुवाच्यसंयोगानुकूलव्यापाराभावरूपफलाश्रयत्वस्य केवले माणवके सत्त्वात् माणवकस्यैव कर्म संज्ञा सञ्जाता न तु अग्नेः। अत्र सूत्रे तमब्–ग्रहणेन यद्यपि प्रयोज्यत्वरूप एव प्रकर्ष आश्रीयते तथाऽपि लाघवात् जन्यत्वरूपप्रकर्षेणैव माणवकस्य अपादानसंज्ञावारणं सम्भवति। एवं तर्हि गुरूभूतप्रयोज्यत्वरूपप्रकर्षाश्रयणस्य किं फलमिति चेत् श्रूयताम् —— द्विकर्मकधातुस्थले द्वौ व्यापारौ भवतः धातोः, तद्यथा 'गां पयोदोग्धी' त्यत्र दुहधातोः अन्तःस्थितद्रवद्रव्यनिष्ठविभागानुकूलव्यापारानुकूलव्यापारोऽर्थः। प्रथमव्यापारः गोपनिष्ठः। द्वितीयव्यापार गोनिष्ठः। गोपव्यापारजन्यः गोनिष्ठो व्यापारः। स च व्यापारः द्रवद्रव्यनिष्ठविभागानुकूलो वर्त्तते। प्रथमव्यापारः इमं गवि जनयति। अत एव तदाश्रयत्वात् गोः कर्म संज्ञा सिध्यति। एवञ्च गोव्यापारजन्यः पयोनिष्ठव्यापारपूर्वको विभागः। अत्र पयोनिष्ठव्यापारस्य विभागनान्तरीयकत्वात् न धातुवाच्यता। अतस्तस्य न उल्लेखः। एवं पयोनिष्ठविभागरूपफलस्य गोपनिष्ठधात्वर्थप्रधानव्यापारजन्यत्वाभावात् कर्मसंज्ञा न स्यात्। अतः साक्षात् परम्परासाधारणं प्रयोज्यत्वं निवेशितम् आस्ते। अत एव ईप्सिततमत्वं नाम

प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वप्रकारकेच्छीयोद्देश्यत्वम्। फले प्रकृतधात्वर्थत्वरूपं विशेषणं कुतो दीयते इति जिज्ञासा जायते। तदुत्तरम् एवं वर्त्तते। फले प्रकृतधात्वर्थत्वरूपविशेषणाभावे ''प्रयागात् काशीं गच्छती'' ति वाक्ये संयोग इव विभागस्याऽपि फलत्वेन





तदाश्रयत्वेन प्रयागस्याऽपि कर्मसंज्ञा आपतति। तद्वारणार्थं फले प्रकृतधात्वर्थत्वरूपविशेषणमावश्यकम्। गम्धतौ। फलं केवलं संयोग एव न तु विभागः। विभागस्तु नान्तरीयकतया गमने उत्पद्यते।

फलाश्रयत्वेनैव सर्वत्र कर्मत्वसिद्धौ पुनः कर्मत्वलक्षणे उद्देश्यत्वं कुतो निवेश्यते इति समुदेति जिज्ञासा। तस्य समाधानमेवं ज्ञायताम्। ''काशीं गच्छन् पथि मृत'' इति वाक्ये काश्याः फलाश्रयत्वं नाऽस्ति। तस्मात् तस्याः कर्मसंज्ञा असंगता स्यात्। एतदसंगतिवारणार्थं लक्षणे उद्देश्यत्वं निवेशनीयमेव। तेन काश्याः फलाश्रयत्वाभावेऽपि फलाश्रयत्वेन इच्छीयोद्देश्यत्वसत्त्वात् कर्मत्वं सुसंगतमेव।

**ईप्सिततमकर्मणो भेदनिरूपणम्**

वाक्यपदीयकारेण भर्त्तृहरिणा आचार्येण ईप्सिततमस्य कर्मणो भेदत्रयं निरमायि। तथा हि–

''निर्वर्त्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधामतम्''

वार्तिककाराः कात्यायनाचार्यास्तु भेदत्रयविशिष्टेषु ईप्सिततमकर्मसु निर्वर्त्त्यं विकार्यञ्चेति द्वयम् उदलेखिषुः।

**निर्वर्त्त्य कर्म** – निर्वर्त्त्यकर्मणो लक्षणं भर्त्तृहरिणा स्वकीये वाक्यपदीये निरमायि।

तथा हि

**यदसज्जायते सद्वा जन्मना यत् प्रकाशते तन्निर्वर्त्त्यम्................।**

(वा0प0 साधनसमुद्देशे–49)

यत् असत् उत्पद्यते तन्निर्वर्त्त्यम्। वैशेषिकाः असत्कार्यवादिनो भवन्ति। तन्मते अभावात् भावस्य उत्पत्तिः। तन्मतमनूद्य अत्र भत्तृहरिः निर्वर्त्त्यकर्मलक्षणं प्रोक्तवान्। अथवा सत एव यत् आविर्भावकसामग्र्या उत्पद्यते तदपि निर्वर्त्त्यम्। इदमाचार्येण हरिणा सांख्यमतमनुसृत्य प्रोक्तम्। सांख्यास्तु सत्कार्यवादिनः सन्ति।

निर्वत्त्यं नाम निर्वर्त्त्यते निष्पाद्यते यत् तदिति। एवञ्च यत्नविशेषप्रयोज्योत्पत्तिमत्त्वं निर्वत्त्यत्वमिति आयातम्। यथा तण्डुलं पचतीतिवाक्ये तण्डुलरूपं कर्म। अस्य निर्वर्त्त्यकर्मणो लक्षणस्य ''तण्डुलान् ओदनं पचती'' ति वाक्ये ओदनादौ। विकार्यकर्मण्यपि अतिव्याप्तिर्भवति। अत एव प्रकृतवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति यत्नविशेष प्रयोज्योत्पत्तिमत्त्वम् इति परिभाषिकं निर्वर्त्त्यकर्मणो लक्षणम्।

तदुक्तमाचार्येण भर्त्तृहरिणा वाक्यपदीये–

**सती वाऽविद्यमाना वा प्रकृतिः परिणामिनी।**
**यस्य नाश्रीयते तस्य निर्वर्त्त्यत्वं प्रचक्षते।।**

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

(वा. प. 4 साधन समुद्देशे 47 का.)

कैयटोपाध्यायास्तु द्विविधं निर्वर्त्यकर्म आहुः। प्रथमं यस्य कर्मण उपादानकारणं नाऽस्ति तत्। यथा संयोगं करोतीति वाक्ये संयोगस्य उपादानकारणं सर्वतन्त्राप्रसिद्धम्। द्वितीयं यस्य कर्मण उपादानकारणमस्ति परन्तु तन्न विवक्ष्यते तदपि निर्वर्त्यं कर्म भवति। ओदनं पचतीति वाक्ये ओदनरूपस्य कर्मण उपादानकारणं तण्डुलं सकललोकतन्त्रप्रसिद्धम्। परं तस्य अत्र अविवक्षा जाता। अतस्तस्य ओदनस्यात्र निर्वर्त्यत्वमायातम्। परमस्मिन् प्रसंगे 'प्रक्रियाकौमुदी' काराणां विट्ठलाचार्याणां मतं भिन्नमेव वर्तते। ते तु असतो जातस्य निर्वर्त्यत्वं, सतो जातस्य विकार्यत्वमाहुः।

**विकार्यकर्म**— वाक्यपदीयकारेण आचार्येण हरिणा विकार्यकर्मणः द्वैवि ध्यं प्रतिपादितम्। तत्र प्रथमं कारणस्य विनाशात् उत्पन्नं भवति। तथाहि——काष्ठं भस्म करोति। अस्मिन् वाक्ये भस्मनः कारणस्य काष्ठस्य दाहेन विनाशो भवति। ततः भस्म उत्पद्यते। इदं वाक्यं निर्वर्त्यकर्मणोऽपि उदाहरणं भवितुमर्हति, यदि काष्ठरूपायाः प्रकृतेः अप्रयोगरूपा अविवक्षा क्रियते। तत्र द्वितीयं–यदा प्रकृतिः नाम कारणं स्वं रूपमत्यजन्ती गुणान्तरसन्निवेशात् विकृता इव प्रतीयते तदाऽपि विकार्यं कर्म भवति। यथा सुवर्णं कुण्डलं करोतीति। यद्यपि असत्कार्यवादिनां बौद्धानां नये अपूर्वस्य कुण्डलस्य उत्पत्तिर्भवति, तथाऽपि तदेवेदं सुवर्णमिति प्रत्यभिज्ञानात् लोके तयोः सुवर्णकुण्डलयोः अभेदः निश्चीयते। वस्तुतस्तु गुणान्तरमात्रस्यैव भेदः सुवर्णकुण्डलयोः वर्तते। एवं गुणान्तरस्य आधानात् यत्र भेदव्यपदेशो भवति, तत्राऽपि विकार्यकर्म इति व्यवहारो भवति।

अत्र सुवर्णं कुण्डलं करोतीति वाक्ये संस्कृतव्याकरणदर्शनकाराः स्व0 रामसुरेशत्रिपाठिनः सर्वथा भ्रान्ताः। तैः विकार्यकर्मणो द्वितीयभेद–निरूपणावसरे उक्तम् —— यद्यपि सांख्यमतेन अस्मिन् वाक्ये विकार्यम् अपूर्वं कुण्डलम् उत्पद्यते इति। तेन कार्यस्य अपूर्वत्वं नैव सिध्यति सांख्यमते। तस्मात् असत्कार्यवादिनामेवायं सिद्धान्तः। तन्मते असतः सज्जायते इति स्वीकारात्। अन्यथा हेलाराजाम्बाकर्त्रीटीकाभ्यां विरोधः स्यात्।

**प्राप्यकर्म**— क्रियाप्रयोज्यो योऽसाधारणो धर्मः तत्प्रकारकप्रतीतिविषयतानाश्रयत्वे सति फलाश्रयत्वं प्राप्यकर्मत्वम्। तद्यथा आदित्यं पश्यति, नगरं गच्छति, वेदमधीते इत्यादि। आदित्यादीनां हि सन्दर्शनादिक्रियया कश्चिदाहितो विशेषो नावधार्यते। प्रमाणाभ्यां क्रियासम्बन्धमात्रं तु लक्ष्यते, न च स एव विशेषः।

कैयटोपाध्यायमतेन सर्वेषु कर्मसु प्राप्यकर्मत्वमनुस्यूततया वर्तते। सर्वाणि कर्माणि क्रियया प्राप्यमाणानि भवन्ति। केवलं प्रपंचार्थं भेदत्रयमुच्यते। विस्तरस्तु वाक्यपदीयसाधनसमुद्देशात् 52, 53 कारिकातः अवगन्तव्यः।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

एवं त्रिविधभेद–विशिष्ट–मीप्सिततम–कर्म निरूप्य सम्प्रति अन्यानि कर्माणि निरूप्यन्ते। वाक्यपदीयकारेण ईप्सितभिन्नकर्मणां चातुर्विध्यमुक्तम्। एषु चतुर्विधेषु प्रथम–द्वितीययोः उदासीनानीप्सितयोः निरूपणं प्रथमं क्रियते। अनयोरर्थयोः पाणिन्युक्तं कर्म संज्ञाविधायकं सूत्रं 'तथा युक्तं चाऽनीप्सित' मिति। अस्मिन् सूत्रे चत्वारि पदानि वर्त्तन्ते। तथा, युक्तम्, च, अनीप्सितञ्चेति। चकारेण पूर्वस्मात् कर्त्तुरिति सूत्रात् कर्मपदमनुवर्त्तते। अनीप्सितमित्येव मुख्यमुद्देश्यमत्र कर्मसंज्ञायाः। तदग्रे निरूपयिष्यते। प्रथमम् उद्देश्यविशेषणानि विविच्यन्ते ——

तथा = तेन प्रकारेण इत्यर्थः। एवं सादृश्यवाचकत्वेन तथा शब्दस्य प्रतियोगिसाकांक्षत्वामायातम्। तर्हि कस्तावत् प्रतियोगी इति जायते जिज्ञासा। अस्याः जिज्ञासायाः शान्तिस्तु तथा शब्दघटकतत्पदेनैव भविष्यति। त्यदादिशब्दानां बुद्धि–विशेषविषयत्वो– पलक्षितत्तद्धर्मावच्छिन्नबोधकत्वं सर्वतन्त्रप्रसिद्धमेव वर्त्तते। तस्मात् तद्धितप्रकृतिभूततच्छब्देन पूर्वसूत्रस्थम् ईप्सिततमपदं गृह्यते। तदेवात्र सूत्रे सादृश्यप्रतियोगी वर्त्तते।

अनीप्सितमिति शब्दे नञः प्रसज्यप्रतिषेधार्थकत्वे ईप्सितं कर्म नेत्यर्थः स्यात् स च अयुक्तः पूर्वेण कत्तुरित्यादि सूत्रेण इष्टत्वात्। अतः पर्युदासोऽयम्। अर्थात् ईप्सितभिन्नम्। एतेन ईप्सितभिन्नानां सर्वेषामेव ग्रहणम्। तेन द्वेष्योदासीनयोः संग्रहः। अनीप्सितकर्मत्वञ्च अनीप्सितेति नञा पूर्वसूत्रे सन्क्ताभ्यां यद् उच्यते इच्छोद्देश्यत्वं तदिह व्यवच्छिद्यते, अन्यत् सर्वं पूर्वसूत्रवदत्राऽपि बोध्यम्। तद्धि कर्तृवृत्तिप्रकृतधात्वर्थ–प्रधानीभूतव्यापार–विशिष्ट फलाश्रयत्वेन वक्त्रा विवक्षितोऽर्थः कारकं सत् कर्मसंज्ञको भवति। वैशिष्ट्यञ्च स्ववाचकवाच्यत्वं स्वप्रयोज्यत्वमितिउभयसम्बन्धेन बोध्यम्।

**उदाहरणसमीक्षा**—

द्वेष्यस्य उदाहरणं सिद्धान्तकौमुद्यां विषं भङ्क्ते' इति लिखितम्। परमिदमुदाहरणं द्वैष्यस्य कर्मणो नैव सम्भवति। यदा विषभक्षणापेक्षया महादुःखस्य सम्भावना भवति तदानीं मनुष्यः विषमति स्वेच्छयैव भक्षयति। अत एव भक्षणक्रियाजन्यफलाश्रयत्वात् इच्छोद्देश्यत्वात् च तस्य विषस्य कर्त्तुरित्यादिनैव कर्मत्वसिद्धिर्भवति। तस्मात् द्वेष्यस्य उदाहरणम्–चोरान्–पश्यति, व्याघ्रान् पश्यति, अहिं लंघयती' त्यादयः। विषयेन्द्रियसम्बान्धात् दृश्यमाना अपि ते न दर्शनोद्देश्याः, स्पर्शोद्देश्यश्च अपि तु अनिष्टदर्शनाः, अनिष्टस्पर्शश्च। उदासीनकर्मण उदाहरणं ग्रामं गच्छन् तृणं स्पृशतीति।

**संज्ञान्तरैरनाख्यातम्**

अत्र संज्ञान्तरैर्नाम करकाधिकारपठितापादानादि– विशेषकारकसंज्ञाभिः अनाख्यातानां कारकाणां कर्मसंज्ञाविधायकं महर्षिपाणिन्युक्तं सूत्रं तावत् अकथितञ्चेति।

अस्मिन् सूत्रे 'कारके' इत्यधिकारात् लब्धं प्रथमान्तं कारकमिति। अकथितमिति तद्विशेषणम्। तदेव अकथितञ्च यत् कारकं तत् कर्मसंज्ञं भवतीति।

द्विविधोऽकथितशब्दो दृश्यते। एको यौगिकः, अपरोऽस्ति रूढः। द्वितीयस्य रूढिः, अप्रधानेऽर्थे। प्रकृते तु रूढस्य अकथितशब्दस्य नैव ग्रहणम्। अन्यथा 'पाणिना कांस्यपात्रे पयो दोग्धी त्यादौ कांस्यपत्रादेः अधिकरणत्वादिविवक्षायामपि अनेन सूत्रेण परत्वात् कर्मसंज्ञा स्यात्। दुहादिव्यतिरिक्त–धातुयोगे तत्तत्संज्ञानां चारितार्थ्यात् इति भावः। अपि तु यौगिकस्य अकथितशब्दस्यैवात्र ग्रहणम्। न कथितः = संकीर्तित इति अकथितः, असंकीर्त्तित इति यावत्। करणे भूतकाले क्तप्रत्ययः। स भूतकालोऽत्र अविवक्षितः। अविवक्षाचाऽत्र कारकत्वेन सामान्यरूपेण, आहोस्वित् कारकत्व–तद्व्याप्य–अपादानादिविशेषरूपेण। अत्र तावत् भाष्यकारः–– ''केनाऽकथितमिति अपादानादिभिः विशेषकथाभिः''। एतावता भाष्येण इदमायातं यत् अविवक्षाह्यत्र कारकविशेषनिबन्धना। यदि सामान्यरूपेण अविवक्षा स्यात् तर्हि कर्मत्वेनाऽपि रूपेण विवक्षा कर्त्तुं नैव शक्यते, तस्याऽपि कारकत्वात्। एवञ्च कारकाधिकारपठितकारकत्व– तद्व्याप्यापादानादिभिरित्यनेन केवलम् अपादानसम्प्रदानाधिकरणानामेव ग्रहणम्, नान्येषाम्। तदग्रे कर्मयुक्त्वविचारप्रसंगे विवेचयिष्यते।

### अकथितत्वं द्विविधम्

प्रथमं प्रसक्तस्य अपादानत्वादेः अपि अपादानत्वादिरूपेण अविवक्षितत्वरूपम्। द्वितीयम् सर्वथा अपादानत्वादीनामप्राप्तिरूपम्। आद्यम् – ''गां दोग्धि पयः'' इति। द्वितीयम् – ''बलिं याचते वसुधाम्'' इति। 'विवक्षातः कारकाणि भवन्ति' इति भाष्यानुसारेण यदा अपादानत्वादिरूपेण विवक्षा तदा तु पंचम्याद्येव। अपादानत्वेन रूपेण विवक्षायाम् गोः दोग्धि पयः इति। सम्बन्धित्वेन विवक्षायां षष्ठी गोः पयो दोग्धीति।

### अस्य सूत्रस्य प्रयोजनम्

अस्य सूत्रस्य प्रयोजनप्रसंगे प्राचीननवीनयोः वैमत्यं दृश्यते। प्राचीनास्तावत् एवमाचक्षते–दुहादीनां धातूनां व्यापारद्वयार्थकत्वस्वीकारे नाऽस्ति सूत्रस्यास्य काचन आवश्यकता, उभयत्र व्यापारजन्यफलाश्रयस्य ''कर्त्तुरीप्सिततम्'' इति सूत्रेणैव कर्मत्वस्य सुतरां सिद्धेः। एवं वैयर्थ्यं भजतोऽस्य वक्ष्यमाणप्रकारेण आवश्यकतां कल्पयन्ति प्राचीनाः। यदा विभागानुकूलव्यापारादिमात्रार्थकत्वं दुहादीनां गोश्च अवधित्वेन न विवक्षा तदा सम्बन्धे षष्ठी प्राप्नोति। तां बाधित्वा सम्बन्धत्वपुरस्कारेण कर्मत्वबोधनार्थमिदं सूत्रम्। अर्थात् अनेन सूत्रेण कर्मत्वे व्यवस्थापिते ''कर्मणि द्वितीया'' इत्यनेन या द्वितीया विभक्तिरायाति सा सम्बन्धत्वपुरस्कारेण कर्मत्वं बोधयतीति। नैतन्मतं प्राचीनानां नव्येभ्यो रोचते। अत एव नव्याः भाष्यप्रमाणप्रतीत्यादिभिः भाष्यतत्त्वमजानतां प्राचीनानां मतं वक्ष्यमाणप्रकारेण खण्डयन्ति।



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

दुहादीनाम् एक व्यापारार्थकत्वपक्षे यदि अकथितञ्चेति सूत्रम्। अतो न षष्ठी इति साम्भावनिकषष्ठ्यपवादत्वम् आश्रित्य सम्बन्धत्वपुरस्कारेण कर्मादि–बोधकताकल्पने कर्तुरीप्सिततममिति सूत्रविहितकर्मसंज्ञावद्बोधकपदोत्तरद्वितीयायाः अपि सम्बन्धार्थकतापत्तिः, कर्मसंज्ञाविधायकस्य षष्ठीविधायकस्य च विरोधाभावेन बाध्यबाधकभावाप्रसक्तिश्च। किंच कर्मत्वपुरस्कारेण कर्मवाचकताविधायकस्य सम्बन्धत्वपुरस्कारेण कर्मवाचकता विधायकस्य च 'कर्मणि द्वितीया'' इति सूत्रस्य वाक्यभेदापत्तिः, एकवाक्येन वैरूप्येण बोधद्वयस्य अजननात्। एतेन षष्ठ्यपवादत्वमात्रेणसम्बन्धत्वपुरस्कारेण कर्मबोधकत्वमस्य सूत्रस्य न युक्तम्। अपि तु यत्राऽनेन कर्मसंज्ञा तत्राऽपि कर्मत्वशक्तिमत्त्वेनैव बोध उचितः। अत एव एतत् सूत्र शेषभाष्ये अनेन एव सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशंक्य ईप्सितमात्रस्यापि अनेन ''संज्ञायां वारणार्थाना' मिति सूत्रस्य अनवकाशत्वे माणवकादावपि पंचमी स्यादिति ईप्सिततममित्यारब्धम्।

दुहादीनां धातूनां यद्यपि गां पयो दोग्धीत्यादौ गौः पयस्त्यजति, गवा पयस्त्याजयति गोपलः इत्याद्यर्थप्रतीत्या व्यापारद्वयार्थकत्वेन कर्तृरित्यादिसूत्रेणैव उभयत्रैव कर्मत्वं सिद्धम्। प्रधानकर्मत्वंच गवादीनामिति तत्रैव लादिसिद्धिः। एवमेव 'शकारमसि चोदित' इति भाष्योपपत्तिः। तथाऽपि यदा पयोनिष्ठविभागानुकूलव्यापारदिरेव धात्वर्थस्तदा अपादानत्वाद्यविवक्षायाम् अन्येन असिद्धकर्मत्वार्थम् इदं सूत्रमावश्यकम्। तदा च अप्रधाने दुहादीनामित्युक्तेरप्रधाने गवादावेव लादयः। अप्रधानकर्मत्वंच उक्तार्थे गवादीनाम् अस्ति एव फलतावच्छेदकसम्बन्धेन फलानाश्रयत्वात्।

अन्यपूर्वकम् = अन्यत् कारकं पूर्वं यस्या, इममेव आशयं मनसि निधाय प्रभायां– पंचोलिना प्रोक्तम्– 'शास्त्रान्तरप्राप्तसंज्ञान्तर–बाधकशास्त्रप्रयोज्यकर्मसंज्ञकमित्यर्थः। अन्यपूर्वक–कर्मसंज्ञाविधायकानि सप्तसूत्राणि आचार्येण पाणिनिना विरचितानि। तद्यथा–क्रुधद्रुहोरूपसृष्टयोः कर्म ।।1 ।4 ।38।। दिवःकर्म च ।।1 ।4 ।43।। अधिशीङ्स्थासां कर्म ।।1 ।4 ।46।। अभिनिविशश्च ।।1 ।4 ।47।। उपान्वध्याङ् वसः ।।1 ।4 ।48।। गतिबुद्धिप्रत्यावसानार्थशब्दकर्म कर्मकाणामणिकर्त्ता सणौ ।।1 ।4 ।52।। ह्रक्रोरन्यतरस्याम् ।।1 ।4 ।53।। एषु प्रथमद्वितीय–सूत्रयोरुल्लेखः हेलाराजेन स्वव्याख्यायां कृतः। हेलाराजेन उपलक्षणन्यायेन द्वयोरेव सूत्रयोः उपादानं कृतम्। अत एव अन्येषामपि संग्रहो बोध्यः।

1. कर्मप्रदेशेषु चोभयगतिर्भवति। 'कर्मणि द्वितीया 'इति कृत्रिमस्य ग्रहणम्, कर्त्तरि कर्मव्यतिहारे इत्यत्राकृत्रिमस्य।

   बहुगणवतुडतिसंख्या 1 ।1 ।22 सूत्रे महाभाष्ये।

2. ''तत्रापीप्सितशब्दः क्रियाशब्द एव'' इति तथाकयुक्तं चाऽनीप्सितमिति मनोरमाग्रन्थे अपीतिप्रयुक्तम् तेन यथा युक्तमित्यत्र कर्त्तुरीप्सितमित्यत्र च ईप्सितशब्दस्य क्रियाशब्दत्वमायाति। मनोरमाटीकाभैरव्यामपि ''तत्रैव वारणार्थाना'' मिति सूत्रेऽपि। अत एव कूपादन्धं वारयतीत्यादौ

कूपादेरपादानत्त्वसिद्धिः। यदीप्सितशब्दः इच्छाविषयपरः स्यात् तदात्र कूपस्यच्छा विषयत्वाभावात् न स्यात्।''

3. सूत्रे कर्तृग्रहणं माऽस्तु। तर्हि केन आप्तुमिष्टतममिति जिज्ञासायां कारकाधिकारात् प्रत्यासत्त्या प्रकृतधात्वर्थलाभः। अर्थात् प्रकृतधात्वर्थ–फलावच्छिन्नेन व्यापारेणति। विशिष्टस्य नवीनमते धात्वर्थतया व्यापारेणेति वक्तुमशक्यम्, संकोचे प्रमाणाभावात्। एतेन तण्डुलादेरेव कर्मत्वं स्यात् न तु फलस्याऽपि। स्तोकादिक्रियाविशेषणस्थले तस्याऽपि कर्मसंज्ञा इष्टा। अत एव तस्य कर्मसंज्ञार्थमिदं कर्तृग्रहणम्।

4. यस्योपादान कारणं नाऽस्ति तन्निर्वर्त्त्यम्, यथा संयोगं करोतीति। यस्याऽपि सदप्युपादान कारणं न विवक्ष्यते तत् निर्वर्त्त्यम्। 'यथा घ्ज्ञटं करोतीति। यदा तु उपादानकारणमेव परिणामित्वेन विवक्ष्यते– 'मृदं घटं करोति ति तद् विकार्यं कर्म। भेद विवक्षायान्तु 'मृदा घटं करोती' ति निर्वर्त्त्यमेव कर्म।

(महाभाष्यप्रदीपे– 3 |2 |1 |)

5. तत्र निर्वर्त्त्यं यद सदेव जायते। यथा घटं करोतीति। विकार्यं लब्धसत्ताकमेव अवस्थान्तरमापद्यते।। (प्रक्रियाकौमुदी भाग,–1 पृष्ठ 383 |)

6. विकार्यन्तु द्वेधा कर्मव्यवस्थितम्। (वा. प. साधनसमुददेशः 50)

7. प्रकृत्युच्छेदसम्भूतं किंचित् काष्ठादिभस्मवत्।

8. पूर्वेण तु लक्षणेन निर्वर्त्त्यमेतत् कर्म प्रकृतेरविवक्षायाम्।। (वा. प. सा. समुददेशे 50 कारिकायां हेलाराजः।

9. किंचित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत् ।|50।। (सा. समुद्देशे)

10. यद्यपि सांख्यामत के अनुसार इन वाक्यों में भी विार्य अपूर्व है। (संस्कृत व्याकरण दर्शन, कारक विचारः 2–90 पृष्ठ में)

11. असत्कार्य नये श्यद्यप्यत्रा पूर्वोत्पत्तिः, तथाऽपि प्रत्यभिज्ञानात् लोके तत्वाध्यवसायात् गुणान्तरमात्रापत्त्रिरूच्यते।। (हेलराजः, साधन समुद्देशे 50 कारिकायाम्)

12. भूषणसारस्य दर्पणटीकाकाराः श्रीहरिवल्लभशास्त्रिणः।

13. क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनाद् अनुमानाद् वा तत् प्राप्यमिति कथ्यते।। वा. प. साधनसमुद्देशः 51 का0।)

14. तत्र प्राप्यत्वं सर्वस्य कर्मणोऽस्ति क्रियया प्राप्यमाणत्वात्। अवान्तर विवक्षायान्तु त्रैविध्यमुच्यते।। (कर्मण्यणिति सूत्रमहाभाष्य प्रदीपे 3 |2 |1)

15. चतुर्धान्यत् तु कल्पितम् औदासीन्येन यत् प्राप्य यच्च कर्त्तुरनीप्सितम् संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।। (वा.प. साधनसमुद्देशः ।|46।।)

16. तथेति भिन्नं पदम् (1 |5 |50 सूत्रे उद्योते नागेशः।)

17. येन प्रकारेण कर्त्तुरीप्सिततमं क्रियया युज्यते तेनैव चेत् प्रकारेण यदनीप्सितं युक्तं भवति तर्हि तस्य कर्मसंज्ञा विधीयते।। (काशिका ।|1 |4 |50।।)





18. यथा अधर्माऽनृतादिभिरूक्तर पदार्थ प्रतिपक्ष भूतं वस्तु तत् प्रतिषेधद्वारेण प्रतिपाद्यते तथा अनीप्सित शब्देनाऽपि द्वेष्यं वस्तु यदभिधीयते तदेव न गृह्यते, किन्तु सर्वमीप्सितान्यदिति।। (कैयटः प्रदीपे 1 |4 |50 सूत्रे।)

19. य एष मनुष्यो दुःखार्त्ते भवति सोऽन्यानि दुःखानि अनुनिशम्य विषभक्षणमेव ज्यायो मन्यते, अतश्चेप्सितं यद् भक्षयति इति। (1 |4 |10 सूत्र महाभाष्ये।)

20. तथा संज्ञान्तरैः अपादानादि संज्ञाभिः अनाख्यातमपि क्रियानिमित्तम् एतत् अकथितंच (पा. 1 |4 |51।) इति तृतीय सूत्र निर्दिष्टंवेदितव्यम्।। (वा.प. साधनसमुद्देशे 46 कारिकायां हेलाराजः।)

21. सम्बन्धोऽत्र गोपयसोः प्रकृतिविकृतिभावः।।

22. अयमर्थः तेषां धातमनामेक व्यापारार्थकत्वपक्षे।

23. वा. प. साधन समुद्देशे 46 कारिकायां हेलाराजः।

24. यथा देवदत्तमभिक्रुध्यति, देवदत्तमभि – द्रुह्यतीति। अत्रहि कुधद्रुहोरूपसृष्टयोः कर्म' इति अनेन क्रुधद्रुहोरूपसृष्टयोः=उपसर्ग सम्बद्धयोः यं प्रति कोपः तत् कारकं पूर्वसूत्रेण सम्प्रदानसंज्ञमपि कर्मसंज्ञमेव भवति। तथा अक्षान् दीव्यति इत्यत्र दिवः कर्म चेति अनेन दिवः साधकतमं यत् पूर्व सूत्रेण करणसंज्ञमेव कर्मसंज्ञमपि।

(वा.प.सा.स. 46 कारिकायां हेलाराजः।)

## सन्दर्भग्रन्थसूची

१. अष्टाध्यायीसूत्रपाठः,दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१०।
२. अष्टाध्यायीसूत्रपाठः,मिश्रनारायणः,चौखम्बा ओरियन्टालिया, वाराणसी, १९७७।
३. लघुशब्देन्दुशेखरः, मिश्रविश्वनाथः, पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८।
४. लघुशब्देन्दुशेखरः, शास्त्रीवैकुण्ठनाथः,अव्ययीभावान्तः, चौखम्बा सुरभारती प्रकाशन, १९९४।
५. वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा-तत्त्वबोधिनीटीका, मोतिलाल बनारसीदास, दिल्ली, २००५।
६. वैयाकरणमहाभाष्यम्, डाः आचार्यसुद्युम्नः, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।
७. वैयाकरणमहाभाष्यम्, मीमांसकयुधिष्ठिरः, रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत,२००८।
८. परिभाषेन्दुशेखरः, मिश्रविश्वनाथः, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२००५।
९. अष्टाध्यायीसूत्रपाठः, प्रह्लादटिप्पणीसहितः, सम्पादकः- पं. सत्यनारायणशास्त्री खण्डुडी, कृष्णदास संस्कृत सीरीज ६५, कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१, १९८५।
१०. महाभाष्यम्,(नवाह्निकम्), सम्पादकः- चारुदेव शास्त्री, मोतिलाल बनारसीदास, दिल्ली, १९६८।
११. वाक्यपदीयम्, ब्रह्मकाण्डम्- श्री वामदेव आचार्यः, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी-२२१००१,१९८७।
१२. महाभाष्यम्, सम्पादक :- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नइ देल्ली- ११००५८,२००६।

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

# लब्धं नेत्रनिर्वाणम्

**डा. पङ्कज मिश्र**
**[एसोसिएट प्रोफेसर, सेण्ट स्टीफेंस कालेज, दिल्ली विश्वविद्यालय, नई, दिल्ली]**

सौन्दर्य संसार की सार्वभौमिक सत्ता है। इसकी अनुभूति प्राय: दो रूपों में होती है। प्रथम विषयगत अथ वा वस्तुनिष्ठ एवं द्वितीय विषयिगत अथ वा आत्मनिष्ठ। यहाँ वस्तुनिष्ठता सर्वजनसुलभ एवं आत्मनिष्ठता मनोवैशिष्ट्यसापेक्ष उपादान है। प्रथम में नयनाकर्षणप्रधान होता है तथा द्वितीय में अन्तर्मन का आकर्षण प्रधान होता है। आकर्षण ही वस्तुत: सौन्दर्य का प्राणतत्त्व है।

सौन्दर्यशास्त्रियों की विवेचना से भिन्न साहित्य की सुकुमार कला के अभ्यासी कवियों में ही ये दोनों दृष्टियाँ उपलब्ध होती हैं। महाकवि माघ की प्रथितोक्ति **क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताया:** में सौन्दर्य की वस्तुनिष्ठ प्रतीति है। अर्थगौरव से अपने काव्य को सौन्दर्यनिकष पर समारूढ करने वाले भारवि ने यह कहकर कि सौन्दर्य प्रेमियों के हृदय अथ वा अन्त:करण में विद्यमान होता है। तद्यथा-**वसन्ति हि प्रेम्णि गुणा न वस्तुषु** सौन्दर्य की आत्मनिष्ठता अथ वा विषयिगतता की स्थापना की है। उक्त उभय सन्दर्भ में सौन्दर्य धारणा का सार्वभौम निरूपण इस प्रकार किया जा सकता है कि इन्द्रियगोचर सौन्दर्य अपने मूलरूप में अपने परब्रह्म के अखण्ड सौन्दर्य का ही सहोदर है, वह वस्तुनिष्ठ है, किन्तु उसका रसास्वादन पूर्णतया मानसिक, हार्दिक व व्यक्तिनिष्ठ है।

महाकवि कालिदास सहज, निरलंकृत सौन्दर्य के समुपासक हैं। उन्होंने सौन्दर्य को प्रकृति के कण कण में एकनिष्ठताविरह के साथ-साथ अत्यन्ताभावविरहित माना है। यही कारण है कि **प्रियेषु सौभाग्यफला हि चारुता, दूरीकृता: खलु गुणैरुद्यानलता वनलताभि:, अहो सर्वास्ववस्थासु चारुता शोभां पुष्यति, किमिव हि मधुराणां मण्डनं नाकृतीनाम्** प्रभृति उन्मुक्त भाव महाकवि के साहित्याकाश में खद्योत की तरह खचित हैं। इनकी सौन्दर्यदृष्टि की चरम व परम परिणति शान्ति में होती है। शान्ति में ही सौन्दर्य की सम्पूर्णता है, विरोध में नहीं। कालिदास ने अपने काव्य-रस-प्रवाह को उसी स्वर्ग-मर्त्य-व्यापिनी सर्वांगसम्पन्न शान्ति में होती है। तभी महाकवि कवि इस सौन्दर्ययज्ञ की पूर्णाहुति इस कथन से करते हैं कि-**लब्धं नेत्रनिर्वाणम्**। नवजागरण के प्रसिद्ध आंग्लकवि स्पेन्सर ने भी सौन्दर्य-स्तवन को Hymn of Beauty कहकर की है।

जीवन की अग्नि को प्रज्वलित रखने के लिये सौन्दर्य के सुवर्ण का आकर्षण अत्यन्त आवश्यक है। आकर्षण ही वस्तुत: सौन्दर्य का प्राणतत्त्व है। यह सौन्दर्य हमारी इन्द्रियों को आश्वस्त करता हुआ, समस्त विकल्पों से बाहर निकालता हुआ मनोगगन की मादक मधुशाला में विराजमान कर देता है,



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

राराजमान कर देता है। और उस मधुशाला से निष्यन्दित सौन्दर्यस्यन्द में सहृदय, ब्रह्मास्वाद-सहोदर हृदयवत् हो जाता है।

कविता वितान का सुवासित साम्राज्य उसका सौन्दर्य हुआ करता है।इस सौन्दर्य की अनुभूति मानवेतर प्राणी भी किया करते हैं। यथा- चकोर पूर्णचन्द्र का दर्शन कर आनन्दविभोर हो उठता है, मयूर मेघ को देखकर आनन्दलीन हो नृत्य करने लगता है, हिरण वंशी की सुमधुरध्वनि सुन स्थिरचित्त हो जाता है। किन्तु मानवमन को यह सौन्दर्य क्षणिक आनन्दमात्र नहीं देता है प्रत्युत अपनी ओर आकर्षित करता है, हृदय पर एक व्यापक प्रभाव छोड़ता है। इसी प्रभाव के कारण मानव में स्नेह, दया, भक्ति, कृतज्ञता प्रभृति सात्त्विक भावों का समुदय होता है।

सौन्दर्य संसार की सार्वभौमिक सत्ता है। इसकी अनुभूति प्राय: दो रूपों में होती है। प्रथम विषयगत अथ वा वस्तुनिष्ठ एवं द्वितीय विषयिगत अथ वा आत्मनिष्ठ।यहाँ वस्तुनिष्ठता सर्वजनसुलभ एवं आत्मनिष्ठता मनोवैशिष्ट्यसापेक्ष उपादान है। प्रथम में नयनाकर्षणप्रधान होता है तथा द्वितीय में अन्तर्मन का आकर्षण प्रधान होता है। इसी को इस प्रकार कहा जा सकता है कि महाकवि ने सौन्दर्य के वस्तुत: दो धर्मों का उल्लेख किया है- नेत्रप्रसादन तथा चित्तहरण। दूसरे शब्दों में, सौन्दर्य नयनों को चमत्कृत कर, द्रष्टा के मनोराज्य पर आधिपत्य जमा लेता है और कठोर से कठोर व्यक्ति को भी अपना उपासक बना लेता है। इन दोनों धर्मों की एकत्र उपस्थिति की अभिव्यक्ति की ही संसृष्टि है-**लब्धं नेत्रनिर्वाणम्**।[1]

सौन्दर्यशास्त्रियों की विवेचना से भिन्न साहित्य की सुकुमार-कला के अभ्यासी कवियों में ही ये दोनों दृष्टियाँ उपलब्ध होती हैं। महाकवि माघ की प्रथितोक्ति **क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयताया:**[2] में सौन्दर्य की वस्तुनिष्ठ प्रतीति है। अर्थगौरव से अपने काव्य को सौन्दर्यनिकष पर समारूढ करने वाले भारवि ने यह कहकर कि सौन्दर्य प्रेमियों के हृदय अथ वा अन्त:करण में विद्यमान होता है (**वसन्ति हि प्रेम्णि गुणा न वस्तुषु**)[3]से सौन्दर्य की आत्मनिष्ठता अथ वा विषयिगतता की स्थापना की है।

उक्त दोनों से भिन्न कालिदास की सौन्दर्यनिष्ठ अवधारणा न तो वस्तुनिष्ठ है न ही आत्मनिष्ठ और न ही उभयनिष्ठ। प्रत्युत प्रसङ्गानुसार वे सौन्दर्यसरित् में डुबकी लगाते हैं। कालिदास ने सौन्दर्य का आ-कण्ठ, आ-प्राण व आ-तृप्त आस्वादन किया था किन्तु मूल्यों के मानदण्ड पर उसे कभी आत्यन्तिक महत्त्व नहीं प्रदान किया था। सौन्दर्यसागर के सम्पूर्ण आवर्त-विवर्तों में पाठक अथ वा भावक को निमज्जित करा कर, कालिदास उसे सत्यं शिवं एवं सुन्दरम् के पुनीत आदर्श-लोक की ओर मोड़ देते हैं और अन्तत: लौकिक प्रेयस् पर पारलौकिक श्रेयस् का अमर सन्देश सुना जाते हैं।

महाकवि कालिदास सहज, निरलंकृत सौन्दर्य के समुपासक हैं। उन्होंने सौन्दर्य को प्रकृति के कण कण में एकनिष्ठताविरह के साथ-साथ अत्यन्ताभावविरहित माना है। यही कारण है कि **प्रियेषु**

**सौभाग्यफला हि चारुता,**[4] **दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः,**[5] **अहो सर्वास्ववस्थासु चारुता शोभां पुष्यति,**[6] **किमिव हि मधुराणां मण्डनं नाकृतीनाम्**[7], **न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते**[8]प्रभृति उन्मुक्त भाव महाकवि के साहित्याकाश में खद्योत की तरह खचित हैं।

कालिदास की सौन्दर्यानुभूति की समग्रता नायिकानिष्ठ है। महाकवि ने अपनी अमर नायिकाओं के रूपमाधुर्य अथ च सौन्दर्य को जिस सजगता से इसमें विवृत्त करने का प्रयास किया है उसी सावधानी एवं कलात्मक नैपुण्य से उसके शील एवं स्वभाव के सौरभ को भी अनावृत करने का उद्योग किया है। यह सौन्दर्य केवल हृदयग्राही ही नहीं है अपि तु मन को सर्वत्मना रसाप्लावित कर उसमें निमग्न कर देने वाला है। उसका सौन्दर्य बाह्य आकृति तक ही सीमित न होकर आन्तरिक गुणों से ओत प्रोत है।

भारतीय सौन्दर्य-धारणा में मनुष्य तथा प्रकृति, दोनों ही एक ही सौन्दर्यतत्त्व का अनुभव करते हुए रसलीन होते हैं और इसी कारण, दोनों ही सीमाएँ प्रायः एक दूसरे में मिल जाया करती हैं। महाकवि इसी मौलिक आस्था से अनुप्राणित होकर सौन्दर्य के वर्णन में मनुष्य तथा प्रकृति को अभिन्न एवं श्रमशील मानते रहे हैं, प्रसंगानुकूल उन्होंने सौन्दर्य को चाहे वस्तुनिष्ठ, चाहे आत्मनिष्ठ कुछ भी बताया हो, उसकी काव्य साधना सौन्दर्य के इस लोकोत्तर सृष्टिव्यापी तथा अविभाज्य स्वरूप की धुरी पर ही घूमती रही है।

महाकवि का यह मानना है कि जीवन जीने के लिये है, उपभोग के लिये है, उसके आकर्षण से न तो व्यर्थ नेत्रनिमीलन की आवश्यकता है न ही उनके दायित्वों से पलायन की आवश्यकता है। जीवन का सम्पूर्ण उपभोग, सौन्दर्य-रस की चर्वणा करते हुए कर्तव्य-पलायन का सन्तोष पाते हुए, निःशेष-भाव से होना चाहिए। किन्तु आत्यन्तिक रूप से हमारे साध्य नहीं हैं, इनमें ही हमारी दृष्टि अटक नहीं जानी चाहिए। हमारा सबसे बड़ा लक्ष्य है पुनर्भव से मुक्ति और परमानन्द की उपलब्धि-**ममापि च क्षपयतु नीललोहितः पुनरागतशक्तिरात्मभूः।**[9]

ऐसा नहीं है कि महाकवि कालिदास ने सौन्दर्य के केवल और केवल वस्तुनिष्ठ पक्ष अथ वा आत्मनिष्ठ पक्ष को ही अधिकारपूर्वक सर्वोत्कृष्ट सौन्दर्य माना है प्रत्युत वे यत्र कुत्रचित् स्वयमेव भ्रान्त दिखते हैं-**न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति।**[10] वे प्रियंवदा से कहलवाते हैं कि आकृति का सौन्दर्य अन्तरात्मा के सौन्दर्य से भी समन्वित होता है। वस्तुतः लोक व्यवहार में ऐसा देखा जाता है कि आकृति एवं गुणों का अनुकूल सामञ्जस्य अपवादजन्य संयोग है। तभी तो बाणभट्ट को कहना पड़ा कि **चन्दनप्रभवो न दहति किमनलम्**[11]? पुलस्त्यकुल में भी पौलस्त्योत्पत्ति देखी जाती है। अर्थात् बाह्यग्राह्य हर वस्तु उत्तम नहीं होता-All that glitters is not gold.

महाकवि के उक्त प्रियंवदोक्ति का समर्थन महाकवि श्रीहर्ष ने भी किया है-**यत्राकृतिस्तत्र गुणा वसन्ति।**[12] (2/51) कालान्तर में आङ्ग्लकवि जॉन कीट्स ने भी इसी प्रकार, सौन्दर्य की एकपक्षीय व्याख्या की[13] कि





Beauty is truth, truth Beauty- that is all
Ye know on earth, and all ye need to know.

किन्तु यह प्रश्न बना ही रह जाता है कि **प्रियेषु सौभाग्यफला हि चारुता** का महोद्घोष करने वाले,**दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः** का समुद्घोष करनेवाले महाकवि ने सहसैव ऐसा क्यों कह दिया कि **न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति**। इसके नेपथ्य में एक ही उद्देश्य अभिप्रेत है। वह यह कि महाकवि व्यवस्थावादी हैं, सम्प्रभु की ही स्तुतिमात्र में लीन रहने वाले हैं। कलावतियों के नहीं लीलावतियों के ही समुन्नायक हैं। तभी तो वे कह बैठते हैं कि-**एको हि दोषो गुणसन्निपाते निज्जतीन्दोः किरणेष्विवाङ्कः**[14], **न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति।**

आचार्य रामचन्द्र शुक्ल ने एक स्थल पर सौन्दर्य के विषय में कहा है कि कुछ रूप रंग की वस्तुएँ ऐसी होती हैं, जो हमारे मन में आते ही थोड़ी देर के लिये हमारी सत्ता पर ऐसा अधिकार कर लेती हैं कि उसका (हमें अपनी सत्ता का) ज्ञान ही हवा हो जाता है और हम उन वस्तुओं की भावना के रूप में परिणत हो जाते हैं। हमारी अनन्त सत्ता की यही तदाकार परिणति सौन्दर्य की अनुभूति है। जिस वस्तु के प्रत्यक्ष ज्ञान या भावना से (यह) तदाकार परिणति जितनी ही अधिक होगी, उतनी ही, वह हमारे लिये सुन्दर कही जाएगी।[15] वस्तुतः उनके सौन्दर्य की अनुभूति भी उसी अनन्त सत्ता की वही तदाकार परिणति है, जिसकी व्याख्या आचार्य शुक्ल ने की है। उक्त उभय सन्दर्भ में सौन्दर्य धारणा का सार्वभौम निरूपण इस प्रकार किया जा सकता है कि इन्द्रियगोचरसौन्दर्य अपने मूलरूप में अपने परब्रह्म के अखण्ड सौन्दर्य का ही सहोदर है, वह वस्तुनिष्ठ है, किन्तु उसका रसास्वादन पूर्णतया मानसिक, हार्दिक व व्यक्तिनिष्ठ है।

इनकी सौन्दर्यदृष्टि की चरम व परम परिणति शान्ति में होती है। शान्ति में ही सौन्दर्य की सम्पूर्णता है, विरोध में नहीं। कालिदास ने अपने काव्य-रस-प्रवाह को उसी स्वर्ग-मर्त्य-व्यापिनी सर्वांगसम्पन्न सौन्दर्य में समाहित कर दिया है। तभी महाकवि इस सौन्दर्ययज्ञ की पूर्णाहुति इस कथन से करते हैं कि-**लब्धं नेत्रनिर्वाणम्**। नवजागरण के प्रसिद्ध आंग्लकवि एडमण्ड स्पेन्सर ने भी सौन्दर्य-स्तवन Hymn of Beauty कहकर की है। अपनी इसी शीर्षक वाली कविता में सौन्दर्य को रंगों, दीप्तियों तथा सुष्ठु स्वभाव के सम्मिश्रण से आगे बढकर स्वर्गीय आलोक के साथ जोड़ दिया है, कायिक सौन्दर्य को आत्मिक सौन्दर्य के साथ संलग्न कर दिया है[16]-

For of the soul the body from doth take
For soul is form, and doth the body make.

महाकवि की उक्त पूर्णाहुति का अनुवाद मानो दिनकर की ऊर्वशी का सौन्दर्य है जहाँ वे कह बैठते हैं कि[17]

दृष्टि का जो पेय है वह रक्त का भोजन नहीं है।
रूप की आराधना का मार्ग आलिङ्गन नहीं है।।

पाद–टिप्पणी–

1. अभिज्ञान0, द्वितीय अङ्क
2. शिशुपालवधम्, 4/17
3. किरातार्जुनीयम्, 8/37
4. कुमारसम्भवम्, 5/1
5. अभिज्ञान0, 1/17
6. विक्रमोर्वशीयम्, तृतीय अङ्क
7. अभिज्ञान0, 1/20
8. कुमारसम्भवम्, 5/9
9. अभिज्ञान0, 7/35
10. अभिज्ञान0, चतुर्थ अङ्क
11. शुकनासोपदेश
12. नैषधीयचरितम्
13. Ode on a Grecian Urn,625/30
14. कुमारसम्भवम्, 1/3
15. कालिदास और उसकी काव्यकला, पृ0 143 पर उद्धृत
16. An Hymn in Honour of Beauty, Edmund Spenser
17.ऊर्वशी, तृतीय/1, रामधारी सिंह दिनकर

**सन्दर्भ–ग्रन्थ सूची**

1. कालिदास और उसकी काव्यकला–वागीश्वर विद्यालंकार, मोतीलाल बनारसीदास, दिल्ली–7, 1988
2. शाकुन्तलविषयक रम्यत्व की अवधारणा– पंकज कुमार मिश्र, परिमल पब्लिकेशन्स,27/28 शक्ति नगर, दिल्ली–7, 2000
3. कालिदास का सौन्दर्य बोध– मुकुलरानी त्रिपाठी, परिमल पब्लिकेशन्स,27/28 शक्ति नगर, दिल्ली–7, 1996
4. साहित्य का मर्म– हजारी प्रसाद द्विवेदी, नैवेद्य निकेतन, वाराणसी, 1965
5. अभिज्ञानशाकुन्तलम्– सुरेन्द्रदेव शास्त्री, रामनारायणलाल बेनीप्रसाद, इलाहाबाद, 1961





# Influence of Postmodernism in the Rasagangadhara

**Nibedita Banerjee[3] & Dr. Anil PratapGiri[4]**
[Dept. of Sanskrit, Pondicherry University, Pondicherry]

Sanskrit literature is one of the most classical language of the world. Sanskrit, Greek, and Latin languages are called sister classical languages due to its vast and most ancient literature which has created intellectual traditions. Sanskrit is very precise and systematic classical language due to its strongest Paniniya Grammar. Literature of the Sanskrit language can be divided into two categories-

1. Classical Sanskrit literature.
2. Modern Sanskrit literature.

Poetics is the major branch of classical Sanskrit literature which is originated from Veda and nourished in Agnipurana. Flourished from Bhamah to PanditrajaJagannatha. Panditraja Jagannatha is well known poetician in the history of classical literary criticism. He is the modern intellectual who has seen literary criticism writing tradition very-well. He has enhanced that tradition in his text called Rasagangadhara. Rasgangadhara is the text in which criticism of literary theories become end. Panditraja has replied successfully all the doubts in this text due to his vast intellectual mega mind capacity. This is the time of 17th century A.D. when modernism was on peak point in the world. Panditraja forwarded himself one more step that is called Postmodernism in his text.

In this research paper I will explore the doctrine of postmodernism in the Rasagangadhara and it would be justified that this latest intellectual discipline is already reveled by Panditraja. That is why Rasgangadhara has a peculiar significance in the present postmodern era.

Post Modernism has been originated in the form of ideology in the occidental countries as a counterpart of modernism; Modernism has originated many socio-political, economical, cultural as well as environmental problems al over the world. To resolve those problems modernism has been converted into post modernism. Major Issues of Postmodernism are listed below:

**1.Central Issues-** abstraction, futurity, individualism, secularism, rationality, freedom, scientific knowledge, morality, etc.
**2. Marginal Issues-** irrationality, plurality, deception, demon, sin, murder, sexuality, madness, hospitals, infamy, fantasy, illusions, corruption, crimes, etc. Anti

[3] Research Scholar
[4] Assistant Professor

Foundationalism, anti Essentialism, anti teleology and anti Logocentrism Human-subjectivity-*Cogito,* Transcendental consciousness, Spirit or *Geist.*

**3. Methodology of Post-modernism:**

- Critique of history as grand narrative, *begriff*or Notion
- No final writing or final struggle.
- Accepting the horizontal character of Hegel/Marx dialectics but not its teleology.
- Proposing ruptures and mutations.
- Reality follows diverse models which are rich in conflicts.

**Influence of postmodernity in India:**

अत्र चरराशौ समेषां ग्रहाणां गमनमिति कारणतः जातकः अपि चरस्वभावयुक्तः अवश्यं भवति अर्थात् सर्वदा चरणशीलः परदेशगामी इत्यादयः गुणाः तस्मिन् भवन्ति इति सर्वत्र अग्रिमेषु अपि योगेषु ऊहा कर्तव्या।

---

[6](बृहज्जातकम्, १२/२)
[7]बृहत्पाराशरहोराशास्त्रम्३६/१९

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17
ISSN 0976-8645

मुशलस्य फलं तु पराशराचार्यैः **"मानज्ञानद्रविणैर्युक्ता नृपतिप्रियाः ख्याताः।"**[8] इति, नलस्य तु **"न्यूनातिरिक्तदेहाधनसञ्चयभागिनोऽतिनिपुणाश्च"**[9] इत्युच्यते। केन्द्रत्रयगतेषु सौम्येषु स्रग्योगः, पापेषु सत्सु सर्पयोगस्य प्रसक्तिः, इमौ क्रमेण सुखदुःखकारकौ अभिहितौ । तद्यथा मिहिरवचनम् –

**"ईर्ष्युर्विदेशनिरतोऽध्वरुचिश्च रज्वां**
**मानी धनी च मुशले बहुकृत्यसक्तः ।**
**व्यङ्गस्थिराढ्यनिपुणो नलजः स्रगुत्थो**
**भोगान्वितो भुजगजो बहुदुःखभाक्स्यात् ॥**[10]

अन्याचार्यैः स्पष्टतः नोक्तत्वात् आचार्यवराहमिहिरैः आश्रययोगाः विशेषतः प्रोक्ताः यवाब्जवज्रगण्डादीनां अन्ययोगसाम्यत्वादपि तेषां कदाचित् पृथकफलत्वात् । तेषां च वैशिष्ट्यानि श्लोकद्वयेन प्रतिपादितानि बृहज्जातककारेण । तद्यथा –

**"आसन्नकेन्द्रभवनद्वयगैर्गदाख्यस्तन्वस्तगेषु शकटं विहगः खबन्ध्वोः।**
**शृंगाटकं नवमपञ्चमलग्नसंस्थैर्लग्नान्यगैर्हलमिति प्रवदन्ति तज्ज्ञाः ॥**[11]

किञ्च

**"शकटाण्डजवच्छुभाशुभैर्वज्रं तद्विपरीतगैर्यवः ।**
**कमलं तु विमिश्रसंस्थितैर्वापी तद्यदि केन्द्रबाह्यतः ॥**[12]

अत्र हि सकलग्रहावस्थानम् आसन्नकेन्द्रद्वयोश्चेद्गदा, लग्नसप्तमयोः शकटम्, दशमचतुर्थयोः विहगः, नवमपञ्चमलग्नेषु शृङ्गाटकम्, लग्नातिरिच्य सर्वेग्रहाः परस्परं त्रिकोणे भवन्ति चेत् हलयोगः अभिहितः । एवमेव अन्येऽपि योगाः प्रोक्ताः वर्तन्ते । तद्यथा –

शकटवच्छुभैः व्यवस्थितैरण्डजवदशुभैश्च वज्रम्, एतद्विपरीतं यवः, एतैरेव सौम्यपापैः विमिश्रसंस्थितैः चतुर्ष्वपि केन्द्रेषु समवस्थितैः कमलः, कमलस्य एव केन्द्रबाह्यत्वात् (पणफरापोक्लिमे स्थितिवशात्) वापी, सर्वग्रहावस्थानं लग्नाच्चतुर्थभावेषु चेत् यूपः, चतुर्थात् सप्तमेषु चेत् शरः, सप्तमात् दशमेषु चेत् शक्तिः, दशमात् लग्नेषु दण्डयोगाश्च प्रोक्ताः ।

लग्नादि सप्तान्तेषु सप्तसु भावेषु सप्तग्रहाः चेन्नौयोगः, चतुर्थाद्दशमान्तेषु सप्तसु सर्वैर्ग्रहैः कूटयोगः, सप्तमादिलग्नान्तेषु सप्तसु भावेषु सप्तग्रहैः छत्रयोगः, दशमादिचतुर्थान्तेषु चापादियोगाः निगदिताः ज्योतिर्मूर्धन्यैः ।

संख्यायोगानां तु संख्यावशात् वैशिष्ट्यमुच्यते । तद्यथा- सप्तग्रहाणां सप्तस्थानेषु संस्थितिवशात् वल्लकी, षट्स्थानेषु दामिनी, पञ्चस्थानेषु पाशः, चतुर्षु स्थानेषु केदारः, स्थानत्रये शूलः, स्थानद्वये युगादयो योगाः प्रोक्ताः । एषां योगानां फलानि च क्रमेण – निपुण-दानी-दुःशील-परोपकारी-युद्धप्रिय-दरिद्रश्चादीनि प्रोक्तानि ।

---

[8]बृहत्पाराशरहोराशास्त्रम् ३६/२०
[9]बृहत्पाराशरहोराशास्त्रम् ३६/२१
[10] (बृ, १२/११)
[11](बृ. १२/४)
[12] (बृ. १२/५)



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17
ISSN 0976-8645

यद्यपि बहूनि नाभसयोगफलानि तत्तन्नाम्नः सदृशफलमेव यच्छन्ति यथा- हलयोगे समुत्पन्नाः बह्वाशिनो दरिद्राः कृषीवलाः दुःखिताः सोद्वेगाश्च भवन्ति।[13] पाशयोगोत्पन्नाः हि बन्धनभाजः कार्ये दक्षाः प्रपञ्चकाराश्च भवन्ति।[14]नौकावाप्यादयः योगाः ग्रहाणां विविधभावैः सह सम्बधवशात् तादृशीं आकृतिं जनयन्ति अतः तेषां तदनुगुणं नामानि स्थापितानि स्युः पूर्वाचार्यैः। किन्तु बहूनां योगानां तन्नाम्नः कः सम्बन्धः इति सम्प्रत्यपि अनुसन्धेयः विषयः। तद्यथा- मुसलयोगोत्पन्नाः मानिनः ज्ञानिनः राजप्रियाः विख्याताश्च भवन्ति इति, अस्य फलस्य नाम्ना सह न कश्चन सम्बन्धः इति।

सामान्यतः इमानि सन्ति शास्त्रप्रोक्तानि नाभसयोगलक्षणानि फलानि च । विषयेऽस्मिन सन्ति हि बहवो वादाः येषां निराकरणं मिहिराचार्याः तत्तत्स्थाने स्वत एव अकार्षुः । तद्यथा -

- विशेषतः दलयोगयोः परित्यागे बीजमुक्तम् –**"केन्द्रोपगप्रोक्तफलौदलाख्यावित्याहुरन्ये न पृथक्फलौ तौ"** इत्यादि क्रमेण ।
- अपरञ्च लग्नसप्तमयोः सौम्याः चतुर्थदशमयोः पापाश्च सन्ति चेत् वज्रयोगो विहितः, यत्तु असम्भवमेव सूर्याच्चतुर्थे शुक्रस्य न कदापि अवस्थितिसम्भवकारणात् । अथापि पूर्वशास्त्रानुरोधेन अमी वज्रादयो योगाः आचार्यैराख्याताः । तदुक्तम्-

**"पूर्वशास्त्रानुसारेण मया वज्रादयः कृताः ।**
**चतुर्थे भवने सूर्याज्ज्ञसितौ भवतः कथम् ॥"**[15]इति।

- तृतीयश्च विशेषस्तावत् आश्रययोगानां फलप्रदानम् । तद्विषये स्वयं प्रत्यपादयन् मिहिराचार्याः –

**"आश्रययोगास्तु विफलाः भवन्त्यन्य विमिश्रिताः ।**
**मिश्रा यैस्ते फलं दद्युरमिश्राः स्वफलप्रदाः ॥"**[16]

अन्ततश्च केन्द्रत्रिकोणेषु स्थिताः शुभाः शुभफलदाः, पापास्त्वशुभफलदाः, इति सामान्यफलकथनत्वात् पुनरपि तत्र योगकल्पना व्यर्थेति केषाञ्चिन्मतम् । यद्येवं तर्हि मिहिराचार्यैः किमर्थमुक्तमिति जिज्ञासायां समादधौ भट्टोत्पलवर्यः –

*'यदि केन्द्रोपगानां खेटानां योगं विनैव फलमङ्गीक्रियेत तर्हि तत्फलं तत्तद्ग्रहदशायामेव वक्तव्यम् इति* । स्वयं मिहिराचार्यास्तु **"नियतफलदाश्चिन्त्या ह्येते समस्तदशास्वपि" इत्यवादिषु"** इत्थं सुफलदाः इमे नाभसयोगाः इति निश्चप्रचं वक्तुं शक्नुमः ।

## सन्दर्भसूची -

१. बृहज्जातकम्, स.- सत्येन्द्रमिश्रः, चौखम्बा सुरभारतीप्रकाशन वाराणसी.
२. बृहज्जातकम्,व्या.- केदारदत्तजोशी, मोतीलालबनारसीदास, वाराणसी.
३. बृहत्पराशरहोराशास्त्रम्, स.- देवचन्द्रझा, चौखम्बा प्रकाशन वाराणसी

---

[13]बृहत्पाराशरहोराशास्त्रम् ३६/२८
[14]बृहत्पाराशरहोराशास्त्रम् ३६/४६
[15] (बृ. १२/६)
[16] (बृ. १२/१२)

.

# द्वे विद्ये वेदितव्ये

**परिमलमण्डलः** [17]

[शोधच्छात्रः, संस्कृतविभाग-पाण्डिच्चेरीविश्वविद्यालयस्थः]

भारतीयबौद्धिकपरम्परा सततगङ्गाप्रवाहसहशा अक्षरा । इयं परम्परा वैदिककालादारभ्य नवाधुनिककालपर्यन्तम् प्रतिनिधिरूपेण प्रचलति । अस्याः परम्परायाः वैशिष्टत्वात् विश्वे नैकाः बौद्धिकपरम्परानुयायिनः स्वकीयपरम्परायां प्रत्यक्षाप्रत्यक्षरूपेण इमं परम्परां प्रति कार्तज्ञं प्रकटिताः । भारतीयज्ञानपरम्परायाः दर्शनं आध्यात्मिकं अस्य दर्शनस्य ज्ञानं गुरूशिष्यपरम्पराप्रणालिया प्राप्यते । ज्ञानस्य भेदः अपि द्विविधः पराविद्यात्मकज्ञानम् अपराविद्यात्मकं ज्ञानश्च । भारतीयबौद्धिकपरम्परा प्रायः मौखिकी यस्याः आचारमीमांसा आध्यात्मिका । अध्यात्मपरकज्ञानेन एव सर्वज्ञानं सिद्धयति इति अस्याः परम्परायाः अभिधेयः । ज्ञानस्य सूक्ष्मातिसूक्ष्मचिन्तनत्वात् टीका परम्परयाः विकासः दरीदृश्यते । टीकापरम्परायां प्रस्थानिका भेदाः अपि दरीदृश्यन्ते । यैः भारतीयज्ञानपरम्परा अतीव गभीरा । सकलभारतीयज्ञानपरमम्परात्मकं ज्ञानं विद्यारूपेण उपहितम् । यस्य वृहद्चर्चा उपनिषद् ग्रन्थेषु परिदृश्यते ।

उपनिषद् शब्दस्तु वेदान्तशास्त्रे पराविद्याशब्देन अभिधीयते । विद्याशब्दः ज्ञानार्थकत्वाद् विद्लृ धातोः निष्पन्नो भवति । यस्य व्युत्पत्तिलभ्यार्थः विद्यते ज्ञायते अनया इति विद्या । उपनिषद्[18] शब्दस्य अर्थसामान्यं निरूपयन् आचार्यशङ्करः आह- उप शब्दो हि सामीप्यमाह। निशब्दश्च निश्चयार्थः । तस्मादैकात्म्यंनिश्चितम्सा विद्या सहेतुं संसारं सादयतीत्युपनिषदुच्यते ।सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्-प्रत्ययान्तस्य रूपमुपनिषदिति । अर्थात् उपनिषद् शब्दस्य अर्थः ब्रह्मविद्या19 यद्यपि शताधिका उपनिषदग्रन्थाः वर्तन्ते तथापि तेषु उपनिषत्सु दशोपनिषद्ग्रन्थानामुपरि श्रीमदाचार्यशङ्करभगवत्पादेन भाष्येन समलङ्कृतम् अलङ्कृताश्च । यथोक्तम्-

**इश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरः**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा ।।**[20]

[17] संस्कृतविभाग-पाण्डिच्चेरीविश्वविद्यालयस्थाः परिमलमण्डलः(शोधच्छात्रः), निबेदितावैनर्जि (शोधच्छात्रा), डा. अनिलप्रतापगिरिः (सहायकाचार्यः) च।

[18] **Upanishad means "a confidential secret sitting"- Paul Deussen.**
**Upanishad means 'a forest gathering- disciples sitting near their teachers engaged in religious discussion'-Hooritz.**
[19] **द्राविडाचार्यः सर्वप्रथमं उपनिषद् शब्दस्यार्थः ब्रह्मविद्या स्वीक्रियते तत्पश्चात् आचार्य शङ्करः अपि तद् अनुसृत्य उक्तम्- Introduction to Brihadarnyaka Upanishad by Kupuswami Sastri.**
[20] **मुक्तिकोपनिषद् 1/30**





कस्यचिदपि वस्तुनो विषयस्य वा सम्यग् ज्ञानं विद्येत्याभिधीयते वेदशास्त्रविज्ञानादिनां साध्वनुशीलनं तत्वार्थज्ञानं च विद्येति स्वीक्रीयते । विज्ञानप्रतिपादने हिरण्यगर्भमूलक अक्षरप्रधानं मुण्डकोपनिषदि अक्षरविद्या नामा पराविद्या एवं क्षरविद्यानामक अपराविद्यायाः तात्विकविश्लेषणम् वर्तते । भौमसर्गव्यवस्थासु एवं भारतीय मानवधर्ममूलक वर्णाश्रमेषु आदिव्यवस्थापक अतएव आदिमनुनाम्ना प्रसिद्धः भगवन् स्वयम्भू ब्रह्मा नित्यसिद्धा तत्वात्मिका अपौरूषेया त्रयीविद्यायाः आधारे यः शब्दात्मिका त्रयीविद्याम् सा ब्रह्मविद्या नाम्नी प्रसिद्धास्ति । यत्र अक्षरानुगता पराविद्या क्षरानुगता अपराविद्या, द्वे विवर्तः दृश्यते । वेदविद्या अपराविद्या अक्षरविद्या पराविद्या । अपराविद्यया पराविद्या सिद्धयते । अपराविद्या इन्द्रियाधृता पराविद्या आत्माधृता । अपराविद्या ज्ञानात्मिका पराविद्या अनुभवात्मिका । ब्रह्मविद्यायां पूर्णं स्वम्भूवः औरसपुत्र अथर्वणे सर्वप्रथमं प्रतिष्ठितम् । अथर्वाः देवसर्गनिवासी अङ्गिरां स्वस्य शिष्यः निर्माणं कृत्वा ब्रह्मविद्या प्रोक्तम् । अङ्गिरे यः विद्या सत्यवाहभारद्वाजाय प्रदत्तम् । भारद्वाजः अङ्गिरसे ब्रह्मणस्तृतीय पुत्राय अङ्गिरोनाम्ने । अतो विशिनष्टि ब्रह्मविद्याम्, परावराम् परं सगुणं ब्रह्म अवरं निर्गुणं ब्रह्म च प्रतिपाद्यतया स्तो यस्यां सा परावरा तां परावराम् । यद्वा परं ब्रह्म विधयत्वेम अवरं तदव्यतिरिक्तं जगतप्रपञ्च निषिद्धत्वेन प्रतिपादितं यस्यां सा परावरा तां परावराम् । अग्रे महाशाल उपाधिलक्षण यशोनाम्नायं विभूषितं शौनकः समित्पाणिः सन् उपसन्नः बहुमानपुरस्सरं समुपेतः अङ्गिरायां प्रश्न पृष्ठवान् **-कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति** ।[21] अर्थात् भगवन् कस्मिन् तत्वविशेषे सर्वं विज्ञातं भवति । अङ्गिरा अपि यस्य सत्पात्रश्च प्रश्नस्य यथावत् समाधानं कृत्वा परावरा विद्यायाः उपदेशं दत्वा शौनकं धन्यं अकरोत् । उक्तं च- **द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च** ।[22] अर्थात् उपनिषदां अनुसारं विद्याद्वयं वर्तते । परा अपरा च । यत्र सोपानारोहण न्यायेन महर्षि अङ्गिरेण सर्वप्रथमं परापरा विद्यायाः निर्देशः क्रियते तदनन्तरम् अपरा विद्यायाः द्वारा परा विद्या सिध्ययति । यतः शाखाचन्द्रन्यायेन पराविद्यायाः ज्ञानात् पश्चात् ब्रह्मतत्वस्य ज्ञानं भवति । ब्रह्मज्ञानात् अनन्तरं सर्वं ज्ञातं भवति । यतः तत्र अपराविद्या सम्पर्के मुण्डक उपनिषदे लिखितम्-

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः**
**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।**[23]

अर्थात् तत्र परापरयोर्मध्ये अपराविद्यायां ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः चत्वारो वेदाः एवं शिक्षा कल्प, निरूक्त, व्याकरण, छन्द ज्योतिष षडवेदाङ्गानि सन्ति । अपरा विद्यायां पराज्ञानातिरिक्त सांसारिकं ज्ञानं अधिकं दीयते तदेव कारणात् वेदः अपरा विद्यायां गण्यते ।

पराविद्यायाः स्वरूपविषये मुण्डकोपनिषदि उक्तं- **अथ परा यया तदक्षरम् अधिगम्यते** ।[24] अर्थात् यस्मिन् विद्यायाम् अक्षरब्रह्मस्य प्राप्तिः भवति तदेव परा विद्या । द्वयोः विद्यामध्ये अपरा विद्या श्रेष्ठा विद्या मन्यते । पराविद्यामाध्यमेन अज्ञानभावोपहितज्ञानस्यनिदिध्यासनं भवति । अपराविद्या तु पराविद्यायाः साधनं अस्ति । तया अज्ञानस्य नाशः भवति । अपराविद्यायाः प्रयोगः माया अर्थे भवति परन्तु पराविद्यायाः उपयोगः ब्रह्मविद्या अर्थे भवति । पराविद्या सा विद्या अस्ति यया विद्यायाः

[21] **मुण्डकोपनिषद् 1/1/3**
[22] **मुण्डकोपनिषद् 1/1/4**
[23] **मुण्डकोपनिषद् 1/1/5**
[24] **मुण्डकोपनिषद् 1/1/5**

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

शब्दातीत अक्षरतत्वस्य बोधः भवति । अपराविद्या सा विद्या यया शब्दब्रह्मस्य तात्विकरूपावगतिः भवति । अपरविद्यात्मिका वेदविद्याया पूर्वसोपानं अस्ति । परन्तु पराविद्यात्मिका अक्षरविद्यात्मिका अपरसोपानमस्ति । द्वयोः प्रतिष्ठा आधिदैविक जगति सूर्यात्मक हिरण्यगर्भप्रजापति एवं आध्यात्मिक जगते तदंशरूप विज्ञानात्मा सृष्टिः जायते । यत्र परा अपरा विद्या चतस्र प्रकारेण प्राप्यते- देवतानां द्वारा, योग साधना द्वारा, तन्त्रमन्त्र द्वारा एवं चमत्कारिक ओषधि द्वारा । परा विद्यायाः पूर्वे अपरा विद्यायाः ज्ञानं आवश्यकम् ।

अपराविद्या विषये गीतायाः सप्तम अध्याये कथितम्-

**भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।**
**अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा।।**[25]

अर्थात् पृथिवीजलाग्निवाय्वाकाशमनबुद्ध्यहङ्काराश्च अपरा शक्ति कथ्यते । एवं सावधानतया श्रोतव्यत्वेनार्जुनं बोधयित्वा पूर्वप्रतिज्ञातस्वस्वरूपज्ञानार्थं स्वस्य सर्वकर्तृत्वं सर्वस्वरूपत्वं चाह भूमिराप इत्यादिभिः। भूमिः आपः अनलः वायुः खम् एवं पञ्च महाभूतानि। मनः सङ्कल्पादिसाधनम् बुद्धिर्ज्ञानात्मिका अहङ्कारोऽभिमानादिरूपः इति। अनेन प्रकारेण इयं मे अष्टधा प्रकृतिर्माया भिन्ना विभागं प्राप्ता । लौकिककार्यार्थमिति भावः। अस्य उत्पत्ति एवं विनाश कारणात् अपरविद्या कथ्यते । यः मिथ्या नाश्वत शक्ति अस्ति । अस्मिन अपराविद्यात् परे चेतन अखण्ड शक्ति अस्ति । यस्मात् सम्पूर्ण ब्रह्माण्ड उत्पन्न जायते । उक्तं च-

**अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।**
**जीवभूतां महाबाहो ययेदं धार्यते जगत्।।**[26]

अर्थात् इयं पुरेदिता दृश्यमाना अष्टविधा प्रकृतिः अपरा अकारः वासुदेवः, परः आधारो, विशेष्यरूपो यस्याः सा अपरा अपरां बहिरङ्गा अस्ति तु किन्तु इतः एतस्याः अन्यां विलक्षणां जीवभूता जीवः प्रत्यगात्मभूतं रूपं यस्या सा जीवभूता तां जीवभूतां मे मम मत्सम्बन्ध प्रतियोगिनीं परन्तरङ्गा प्रकृतिं चिद्रूपां विद्धि जानीहि यया चिच्छक्त्या प्रकृत्या इदं जगत् धार्यते जडरूपमाधारीक्रियते । अत्र जगदिति सभिप्रायं इदमचित् तत्त्वम् । जगत् जायते गच्छतीति जगत् जन्ममरणादिकपरिणामः । अचित् जगत् भवति नवा जीवे नवा जगदीश्वरे किन्तु इदं मे विशेषणमतो विशेषणांशपरिणामो समुपचर्यते मयि । यथा दण्डे नष्टे तद्धारके दण्डीत्युपचर्यते । अतः यस्मात् असंख्य ब्रह्माण्ड सृष्टिः एवं विनाशः भवन्ति । अतः यः पराशक्ति अथवा योगमाया अथवा अक्षर ब्रह्म अपि कथ्यते । पराशब्दस्यानेकार्थत्वात् विवक्षितमर्थमाह अपरेति। परा इत्यस्योपपादनमियं धार्यते तयेत्यादि । अनन्ता देशतः गुणतश्च । परा मुख्या अनादिनिधना नत्वव्यक्तवद्विक्रियावती । अथ अनन्तरं यया विशेषविद्यया तदक्षरं सर्वव्यापकमधिगम्यते सामीप्येन प्राप्यते सा परा विद्या । अथ वेदचतुष्टयमपराविद्याकक्षौ निवेशितम्, परायाः विद्यायाश्च उपनिषत्प्रतिपादितत्वं तासां वेदचतुष्टये एवान्तरभाव इति विषमोपन्यासः, यदि परात्वेनोपनिषदां संकीर्तनं तदा वेदबहिर्भूतत्वेनावैदिकत्वमूलकप्रामाण्यापत्तिः वेदान्तर्गतत्वे तास्वापरात्वापत्तिरिति उभयतः पाशारज्जुः उच्यते । तत्र वेद शब्देन ज्ञानकाण्डव्यतिरिक्तवेदराशिः

[25] श्रीमद्भगवद्गीता 7/4

[26] श्रीमद्भगवद्गीता 7/5



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

गृहीतव्यः । ज्ञानकाण्डीयस्य तु परात्वेन विवक्षणात् विशेषविहितत्वेन ब्राह्मणवशिष्ठन्यायानुसारं वैदिकत्वऽपि पृथगुपादानं वैशिष्ट्यश्च सूचनायेति विरम्यते ।

शङ्कराचार्यमतानुसारेण- अतः परमनयोर्विद्ययोर्विषयौ विवेक्तव्यौ संसारमोक्षवित्युत्तरो कर्त्रादिसाधनक्रियाफलभेदरूपः संसारोऽनादिरनंतो दुःखस्य स्वरूपः प्रत्येक शरीरिभिः अपराविद्याः वर्तते । स मत्स्येन नदीस्त्रोतोवद् विच्छेदरूपसम्बन्धः वर्तते ।

पराविद्या तु मोक्षः अनाद्यनंतो अजरो-अमरो-अमृतो-उभयः शुद्धः प्रसन्नः स्वात्मप्रतिष्ठा लक्षणः परमानंदोऽद्वयं इति । अपराविद्यापेक्षिकम् पराविद्याविषये कर्मफलं सत्यं वर्तते । पराविद्यायाविषयं परमार्थं सल्लक्षणत्वात् विद्याविषये तदेतत्सत्यंयथाभूतम् । संक्षेपतः पराविद्याविषयंमक्षरं निर्विशेष पुरूषं सत्यं 'दिव्यो ह्यमूर्तः' इत्यादिभि ।

यया तत् वक्ष्यमान विशेषणविशिष्ट अक्षरब्रह्म अधिगम्यते । अर्थात् अधि पूर्वक गम् धातोः प्राप्ति अर्थः प्रायिक । परप्राप्तेः एवं अवगतेः अर्थगतः कोऽपि भेदः नास्ति । अतः परप्राप्तेः अर्थः अविद्याविनाश भिन्न किमपि नास्ति । परन्तु यत्र शङ्काः जायते । यदि पराविद्या ऋग्वेदादि वहिर्भुतः कथं सा पराविद्या अथवा मोक्षस्य साधनमस्ति । एतेषां शङ्का निवारणार्थं स्मृतिकाराः स्मरन्ति-या वेदवाह्याः स्मृतयोः याः काश्च कुदृष्टयः । कुदृष्टयः निष्फलत्वं हेतोः अग्राह्य भवति एवं उपनिषदां ऋग्वेदादि वाह्यता भवति , अतः ऋग्वेदिनां पृथक करणं अनर्थकं । तर्हि कथं पर इति । न पृथक निर्देश निरर्थकं न भवति । प्रश्नः भवति किमर्थं ? अस्य प्रश्नस्य समाधानर्थं अत्र विज्ञेयविषयविज्ञानस्य अथवा साक्षात्कारस्य विवक्षित इति उक्तं । वेदशब्देन तु सर्वत्र शब्दराशि विवक्षितः अर्थात् उपनिषदवेद्य अक्षरब्रह्म विषयक ज्ञान अत्र पराविद्या । अथ कीदृशं अक्षरब्रह्म इति प्रशनस्य समाधानार्थं मुण्डकोपनिषदे उक्तं च-

**यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादम् ।**
**नित्यं विभुं सर्वगतं सुसूक्ष्मंतदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः ।।**[27]

तदक्षरं किदृशमतो निरूपयति-यत्तत्छब्दोऽयं ब्रह्मणऽनिर्वचनीयत्वपरः, अद्रेश्यं न द्रुष्टुं शक्यम्, अतएव अग्राह्यम् अन्यज्ञानेन्द्रियैरिति शेषः, अगोत्रम, नास्ति गोत्रं यस्य तत् सर्वेषामुत्पादकत्वात् गोत्रहितम्, अवर्णम् नास्ति वर्णविशेषो यस्य तत् अस्मदादिवत्वर्णरहितम् यद्वा अनुपमः वर्णः श्यामवर्णः यस्य तथा भूतं, न विद्यमाने चक्षुश्रोत्रे यस्मिन् तत् अचक्षुःश्रोत्रं ज्ञानेन्द्रियातीतं तत्, यद्वा अनुपमे चक्षुश्रोत्रे यस्य तत् अपाणिपादं नास्ति पाणिपादं यस्य तादृशं कर्मेन्द्रियातीतम् अथवा अनेकानि पाणिपादानि यस्य तत्, एवमचक्षुरित्यत्रापि व्याख्यातव्यम्, एवं नित्यं ध्वंसरहितं, विभुं विविधः कच्छमत्स्यावाराहादिरूपो भवतीति विभुः तम् सुसूक्ष्मं सूक्ष्मशरीरतोऽपि सूक्ष्मतरमे, अव्ययम् अनश्वरं भूतयोनिम समस्तप्राणजनकं धीराः पराविद्योपासकाः परिपश्यन्ति परितो नयनविषयं कुर्वन्ति इति भावः ।

मूण्डकोपनिषदि द्वयोः विद्यायाः प्रसङ्गे आलोचना वर्तते – पराविद्या माध्यमेन ब्रह्मस्य ज्ञानं उत्पाद्यते । प्रकृतपक्षे अपराविद्या एवं पराविद्या द्वयोः ब्रह्मज्ञान प्राप्ते अन्यतम साधनं वर्तते । अपराविद्या तु ब्रह्मज्ञानस्य प्रथमं सोपानं वर्तते । पराविद्या तु मुख्य साधनम् । पराविद्यया माध्ममेन ब्रह्मस्य ज्ञानं जायते । अतः ब्रह्म एवेदं विश्वं सर्वम् । तपो ज्ञानं तत्कूलं फलमन्यदेतावद्धीदं सर्वम् । तस्मात् सर्वं ब्रह्म परामृतं परममृतमहमेवेति यो वेदो निहितं गुहायां ह्रदि सर्वप्राणिनां स एवं विज्ञानादविद्याग्रन्थि

[27] मुण्डकोपनिषद् 1/1/16

ग्रन्थिमिव दृढीभूतां वेधावासनां विकरति विक्षपति विनाशयति। पराविद्योक्ता यया तदक्षरं पुरूषाख्यं सत्यमधिगम्यते। यद् अधिगमे हृदयादि साक्षात्कारणस्य आत्यन्तिकविनाशः स्यात् एवं आत्यन्तिकविनाशस्य पश्चात् मोक्षस्य प्राप्तिः भवति। छान्दोग्यपनिषदि नारद-सनत्कुमार संवादे अपि अस्या विद्यायाः पार्थक्यं दर्शयति-

**मन्त्रविदेवास्मि नात्मविच्छ्रुतं ह्येव मे भगवद्दृषेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तं होवाच यद्वै किञ्चैतदध्यगीष्ठा नामैवैतत्।**[28]

अर्थात् एतां समस्तां विद्यामधित्यापि नारदः मन्त्रवित् मन्त्रं वेत्ति इति मन्त्रवित् केवलं मन्त्रज्ञाता न एव मन्त्रार्थज्ञाता मन्त्रार्थज्ञानमन्तरेण आत्मज्ञानं न सम्भवति । तात्पर्यमेतत् यत् आनुपूर्व्या वेदश्रुतिः प्राप्तवानस्ति, मन्त्रान् विन्दति इति मन्त्रवित् पिञ्जरगत शुक इव मन्त्रमात्रं रटति, न च तदर्थं चिन्तयति मन्त्रा हि श्रुतयः , मन्त्रार्थो हि परमेश्वरः नात्मवित् आत्मा परमात्मा आत्मा जीवात्मा, आत्मा च इति आत्मानां तौ वेत्तीति आत्मवित् न वेत्तीत्यनात्मवित् , आत्म परमात्मस्वरूपं सेवकसेव्यभावात्मक न जानाति इति तात्पर्यम्। अतः उपनिषदां स्पष्टं मन्तव्यमस्ति- अपरा विद्यायाः अभ्यासेन आत्मसाक्षात्कारं भवति।

अतः यया लौकिक ज्ञानं जायते सा अपरा विद्या। यया च अक्षरब्रह्मविषयक ज्ञानं जायते सा परा विद्या । विद्यैव तद् साधनम् यया सर्वोऽपि मानवीयो मनोरथोऽभिलाषो वा पूर्यते । विद्यैव कर्तव्याकर्तव्यज्ञानम्, धर्माधर्म-परिज्ञानम्, पुण्यापुण्यविवेकः, लाभालाभावबोधश्च भवति । विद्यैव लक्ष्यनिर्धारण, लौकिक-विषयव्याप्तिः, भौतिकसुखसाधनम्, भूमि-गृह-विभवादीनाम् अवाप्तिश्च । लोके पराविद्यैव तद् ज्योतिः यद् मानवे ज्ञानज्योतिर्ज्वलयति, अविद्यान्धतमसमं व्यपोहति, दुर्गुणगणं वारयति, सद्गुणगणं वारयति, सद्गुणतीतं संचारयति, कीर्ति प्रथयति, गौरवं विकासयति । युनानि तत्वज्ञ अपि परापरा विद्या स्वीक्रियते। तस्य मतानुसारेण दोक्सा' तथा 'एपिस्टेमी[29] परापरा विद्या अस्ति।

## सन्दर्भग्रन्थसूची-


1. Sharvananda, Swami. Mundaka and Mandukya Upanishads. Madras: Sri Ramkrishna Math, 1920.
2. गम्भीरानन्द, स्वामी. उपनिषद् ग्रन्थावली. कोलकाता: उद्बोधन कार्यालय, 2014.
3. चिन्मयानन्द, स्वामी. मुण्डकोपनिषद् . एरणाकुलम्: सेन्ट्रल चिन्मय मिशन, 1999.
4. निखिलानन्द, स्वामी. मुण्डकोपनिषद्. अद्वेत आश्रम, 2006.
5. मिश्र, जगदीशचन्द्र. भारतीय दर्शन. वाराणसी: चौखम्भा सुरभारती प्रकाशन, 2012.
6. शिङ्, करण. मुण्डकोपनिषद्. मुम्बइ: भारतीय विद्या भवन, 1987.
7. श्रीमद्भगवद्गीता शांकरभाष्य हिन्दी अनवादसहित. गोरखपुर: गीताप्रेस, सं 2073.


[28] केनोपनिषद् 2/13

[29] https://hi.wikipedia.org/wiki अपराविद्या12/05/2017





# उपनिषदों में ओङ्कार की उपासना

**श्री विवेकशर्मा**

[सहायकाचार्य, हिमाचलप्रदेश केन्द्रीय विश्वविद्यालय, धर्मशाला, हिमाचल-प्रदेश।]

ओङ्कार के बिना हमारी सनातन हिन्दु संस्कृति की तो कल्पना भी नहीं की जा सकती है । प्रणव समस्त ज्ञानों की निधि और स्तोत्र है। पतञ्जलि ने "तस्य वाचकः प्रणवः"[1] कहकर ओ३म् को ईश्वर का वाचक बतलाया है। प्रणव पूर्ण ब्रह्माण्ड में व्याप्त है। यह सदैव अभिनव बना रहता है। स्वरुपतः यदि ओङ्कार का विवेचन किया जाये तो प्रणवोपनिषद् में कहा गया है, जब मोक्ष के पास मुमुक्षु होता है तो काँसे के घण्टे सा शब्द होता है। इस ओङ्कार को भी ऐसे ही स्वरुप का समझना चाहिये। वेद स्वरुप इस ओङ्कार को सभी सुनना चाहते हैं।[1] ओङ्कार की महिमा में तो यहाँ तक कहा गया है कि समस्त वेद जिस पद का वर्णन करते हैं, समस्त जगत् जिसकी प्राप्ति का साधन मात्र है। जिसकी इच्छा से मुमुक्षु जन ब्रह्मचर्य का पालन करते हैं, उस पद को यदि संक्षेप में कहा जाये तो वह ओङ्कार ही है[1]।

व्युत्पत्यनुसार ओ३म् मन् प्रत्यय और टिलोप होकर "अव्-रक्षणे" धातु से सिद्ध होता है[30]। वाचस्पत्यम् के अनुसार ओ३म् शब्द अनेक अर्थों में प्रयुक्त होता है । ओ३म् शब्द आरम्भ, स्वीकार, मङ्गल, शुभ और ब्रह्म के अर्थों में प्रयुक्त होता है[31]। छान्दोग्योपनिषद् में ओ३म् को उद्गीथ से अभिन्न बतलाते हुये कहा गया है कि निश्चित रूप से जो उद्गीथ, गेय परम देव है, वही प्रणव है और जो प्रणव है वही उद्गीथ है । यह जो आदित्य है वही उद्गीथ है और वही प्रणव भी है। अर्थात् जो साधक आदित्य (परमधाम) में परमात्मा और उसके वाचक ओ३म् की भावना करता है, वह ओ३म् स्वर का उच्चारण करता हुआ परम धाम को प्राप्त कर जाता है। इस तरह **ओ३म्, प्रणव, ॐकार, उद्गीथ** ये सब एक अर्थ को ही अभिव्यक्त करते हैं । कई उपनिषदों में मुक्त कण्ठ से ओङ्कार की महिमा गई है । कठोपनिषद् में ओङ्कार को ही ब्रह्म प्राप्ति के एकमात्र उपाय के रूप में स्थापित करते हुए कहा गया है कि ओङ्कार ही परब्रह्म परमात्मा की प्राप्ति के लिये सब प्रकार के आलम्बनों से श्रेष्ठ आलम्बन है एवं यही चरम आलम्बन है । इससे परे कोई आलम्बन नहीं । ओङ्कार के रहस्य को समझकर जो साधक श्रद्धा एवं प्रेमपूर्वक ओङ्कार रूपी आलम्बन पर आश्रित होता है वह निःसन्देह परमात्मा की प्राप्ति रूपी परम पद को प्राप्त कर लेता है[32]। मुण्डकोपनिषद् में परम तत्त्व की प्राप्ति का साधन ओ३म् ही बतलाया गया है । यहाँ निर्दिष्ट है कि रथ की नाभि में अरों के समान समस्त नाड़ियाँ जिस हृदय में स्थित हैं उसी हृदय में ओ३म्

[30] अवतेष्टिलोपश्च। उणादिसूत्रम्, १/१४

[31] वाचस्पत्यम्, भाग १, पृष्ठ १५५८

[32] एतदालम्बनं श्रेष्ठम् एतदालम्बतनं परम् एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ कठोपनिषद्, १/२/१०

इस नाम के द्वारा ही सर्वात्मा का ध्यान करने से ईश्वर प्राप्त होते है[33]। उपनिषद् में आकाश को ब्रह्म बतलाया गया है[34], एवं गार्गी को उत्तर देते हुये याज्ञवल्क्य बतलाते हैं कि जिससे यह आकाश ओतप्रोत है, उस तत्त्व को ब्रह्मवेत्ता अक्षर कहते हैं[35]। यहाँ कहने का भाव यह है कि ब्रह्मरूपी आकाश भी ओङ्कार से ही ओतप्रोत है। इसके अतिरिक्त उपनिषदों में ओङ्कार की नानाविध रूपों में महिमा गायी गई है। उपनिषदकारों ने कई सुन्दर उपमाओं द्वारा ओङ्कार की महिमा का यशोगान गाया है, यथा छान्दोग्योपनिषद्कार बतलाते हैं कि जिस प्रकार शंकु द्वारा समस्त पत्ता नसों से व्याप्त होता है उसी प्रकार ओङ्कार द्वारा समस्त वाणी व्याप्त है[36]। लेकिन सम्पूर्ण उपनिषदीय वाङ्मय में माण्डूक्योपनिषद् की ख्याति ओङ्कार विवेचन के कारण है। माण्डूक्योपनिषद् में प्रणवोपासना का उल्लेख चेतना की अवस्थाओं के साथ किया गया है। माण्डूक्योपनिषद् में स्पष्ट किया गया है कि इसमें केवल तीन मात्रायें अ, उ, म् ही नहीं हैं, वरन् इसमें चौथा (तुरीय) मात्राहीन नाम भी है, ओंकार के इन चार भागों के करने की चेष्टा में उपनिषत्कार का स्पष्ट उद्देश्य ओंकार के चारों भागों को चेतना की अवस्थाओं और आत्मा के प्रकारों को सांगतिक बनाना है। एक ओर यह जाग्रतावस्था, स्वप्नावस्था, सुषुप्त्यावस्था और तुरीयावस्था का प्रतीक है, वहीं दूसरी ओर यह विविध प्रकार की आत्माओं, वैश्वानर, तैजस, प्राज्ञ का प्रतीक है। ओंकार का अमात्रिक भाग मन की तुरीयावस्था का सांगतिक है। इस प्रकार दृष्टिगोचर होता है कि माण्डूक्योपनिषद् में प्रणवोपासना का महत्त्व तथा आध्यात्मिक मूल्य अनुपम है।

श्वेताश्वतरोपनिषद् हमें निर्देशित करता है कि हमें अपने शरीर को नीचे की अरणी समझना चाहिये तथा प्रणवोपासना को ऊपर की अरणी। और दोनों अरणियों के परस्पर संघर्ष से अपने में गुप्तरूप से सन्निहित ईश्वर रूपी अग्नि को निर्मन्थन प्रक्रिया द्वारा प्रकट करना चाहिये[37]। तैतिरीयोपनिषद् में कहा गया है कि ओ३म् यह ब्रह्म है। ओ३म् ही यह प्रत्यक्ष दिखाई देने वाला जगत् है। ओ३म् यह निःसन्देह अनुकृति ही है[38]। छान्दोग्योपनिषद्कार का भी कहना है कि ओङ्कार ही परमात्मा है एवं ओङ्कार ही सब कुछ है[39]। छान्दोग्योपनिषद् में उद्गीथ दृष्ट्या प्रणवोपासना का महत्त्व दिखाते हुये कहा गया है कि यह जो उद्गीथ है वह सम्पूर्ण रसों में उत्कृष्ट, परमात्मा का प्रतीक होने योग्य और पृथ्वी आदि सभी रसों में आठवां है[40]। आगे कहा गया है कि जो विद्वान् उपासक उद्गीथ रूप में प्रणवोपासना करता है, वह सम्पूर्ण कामनाओं की प्राप्ति कराने वाला होता है[41]। गीता में श्री कृष्ण ने कहा है – मैं सम्पूर्ण वेदों में प्रणव हूँ[42]।

---

33 अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः। ओमित्येव ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्। मुण्डकोपनिषद्, २/२/६

34 ॐ खं ब्रह्म ॥ बृहदारण्यकोपनिषद्, ५/१/१

35 अक्षरे गार्ग्याकाश ओतश्च प्रोतश्च ॥ तत्रैव, ३/८/११

36 यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानयेवमोङ्कारेण सर्वा वाक् तृण्णा ॥ छान्दोग्योपनिषद्, २/२३/३

37 स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मनाभ्यासाद्येवं पश्येन्निगूढवत्। श्वेताश्वतरोपनिषद्, १/१४

38 ओमिति ब्रह्म। ओमितीदं सर्वं। ओमिदत्येदनुकृतिः। तैत्तिरीयोपनिषद्

39 ओंकार एवेदं सर्वमोङ्कार एवेदं सर्वम् ॥ तत्रैव, २/२३/३

40 स एष रसान्नं रसतमः परमः पराध्र्योऽष्टमो यदुदगीथ। छान्दोग्योपनिषद्, १/१/३

41 आपयिता ह वै कामान्नं भवति य एतदेवं विद्वानकारमुपास्ति। छान्दोग्योपनिषद्, १/१/७

42 प्रणवः सर्ववेदेषु। श्रीमद्भगवद्गीता, ७/८





प्रणव शब्द की महाशक्ति है। वाक् का विकास भी प्रणव से होता है। ज्ञान का आधार प्रणव है। प्रणव जो ओ३म् भी है वह आध्यात्मिक शक्तियों का स्रोत है। गीता में कहा गया है कि जो पुरुष स्मरणपूर्वक ओ३म् का उच्चारण करते हुये शरीर त्यागता है उसे परम गति मिलती है[43]। श्रद्धा और संयम से सत्कारपूर्वक ओ३म् का उच्चारण स्वयं में एक पूर्ण साधना है। ओ३म् का उच्चारण करते-करते **सोऽहं** की ध्वनि उठने लगे और कार्यरूप में परिणत हो जाये तब ब्रह्म के साथ एकता तथा ओ३म् को आत्मसात् मानना चाहिये। गोपथ में लिखा है कि जो एकाक्षर अविनाशी ओ३म् नाम की ऋचा का कुशा के आसन पर बैठ कर पूर्वाभिमुख हो, वाक् संयम सहित तथा तीन रात्रि तक उपवास करके जप करता है, उसके समस्त अर्थ और काम सिद्ध हो जाते हैं[44]।

अतः साररूप से यही कहा जा सकता है कि ओंकार समस्त वाङ्मय, निखिल शास्त्रीय तथा साहित्यिक राशि का स्रोत है। यह मानव तृप्ति की सहज अभिव्यञ्जक ध्वनि है। ब्राह्मणों तथा उपनिषदों में इसकी त्रिमात्राओं की व्याख्या उपलब्ध है यह मानव हृदय-पटल पर इसके महत्त्व को अङ्कित कर देती है। समस्त ज्ञानियों का सहारा ओङ्कार ही है। कर्मकाण्ड में इसका आलम्बन किया जाता है। भक्तिभावना का तो यही एकमात्र सहारा है। इसलिये ही उपनिषदों के माध्यम से मनीषियों ने ओ३म् की महिमा का उद्घोष किया है।

**सन्दर्भग्रन्थसूची**


1. ईशादि नौ उपनिषद्(६६), हरि कृष्ण गायेन्दका, गीताप्रेसगोरखपुरम्, विक्रमी संवत् २०६८
2. छान्दोग्यापनिषद्(५८२), गीताप्रेसगोरखपुरम्,विक्रमी संवत् २०६९
3. पातञ्जल योग प्रदीप, ओमानन्दतीर्थ, गीताप्रेस गोरखपुर, विक्रमी संवत् २०७२
4. श्रीमद्भगवद्गीता-साधकसंजीवनी, स्वामी रामसुखदासः, गीताप्रेस गोरखपुर, विक्रमी संवत् २०६६, सप्ततितिमं पुनर्मुद्रणम्
5. वाचस्पत्यम्, तारानाथतर्कवाचस्पति भट्टाचार्य,चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०२६
6. उपनिषत् समुच्चयः, प० भीमसेन शर्मा, हरियाणा साहित्य संस्थान, गुरुकुल झज्जर, प्रथम संस्करणम् २०००


---

43 ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्। यः प्रयाति त्यजन्देहं स याति परमां गतिम्। श्रीमद्भगवद्गीता, ८/१३

44 तत् एतत् अक्षरं ब्राह्मणो यं कामं इच्छेत् त्रिरान्नेपोषितः प्रादमुखो वाग्यतो बर्हिषि उपविश्य सहस्त्रं कृत्वा आवर्तन चेत् सिद्धयन्ति अस्य अर्थाः सर्वकर्माणि च। गोपथः, १/२१

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

# व्याकरणाध्ययनस्य प्रयोजनम्

**डा रविनाथ शुक्ल**
[श्रीनिकेतनम्, अयोध्या, उत्तरप्रदेश]

जगत्यस्मिन् प्राणिनां परस्परं स्वाभिप्रायं स्वकीयानि प्रयोजनानि स्वकार्याणि सिद्ध्यर्थं परस्परं व्यवहारार्थं शब्दप्रयोगस्यावश्यकता भवति। शब्द व्यवहारं विना लोके कस्यापि किमपि कार्यं भवितुं नार्हति मात्र संकेतेनैव कार्य निर्वाहे जाते शब्दस्य किमपि प्रयोजनं न सिद्ध्यति। संकेतेन व्यवहारस्तु दूरात् भवितुं नार्हति। अत एव भगवता प्राणिशरीरे शब्द शक्ति प्रदत्तास्ति। शब्दस्तु ध्वन्यात्मको, स्फोटात्मकश्च भवति। **"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्षते।"** (वा.प.ब्र.का.)

**"परावाङमूलचक्रस्था, पश्यन्ती नाभि संस्थिता।**
**हृदिस्थो मध्यमा ज्ञेया, वैखरी कण्ठदेशगा।।"**
**वैखर्यां हि कृतो नादः परश्रवणगोचरः।**
**मध्यमा कृतो नादः स्फोटव्यञ्जक उच्यते।।**
(परमलघुमञ्जूषा स्फोटनिरूपणम्)

इति वाचश्चातुर्विध्यं शास्त्रेषूक्तमस्ति।

स्फोटात्मकः शब्दः अर्थवाचको भवति ध्वनिस्तु स्फोटव्यञ्जको भवति स्फोट शब्दः, ध्वनिः शब्दगुणः। यथोक्तम्। इत्थं येनोच्चारितेन अर्थ सम्प्रत्ययो भवति स शब्दः। अर्थ बोधनायैव शब्द प्रयोगो भवति। शब्द प्रयोगं विना स्वाभिप्रायाः न बोधविषयाः भवन्ति। अथ कथं लोकव्यवहारः सिद्ध्यति। एतदर्थमेव शब्दप्रयोगस्यावश्यकता भवति। परन्तु शब्दानां वैविध्येन भाषा भेदोऽपि दृश्यते, भाषा भेदेन शब्दाः भिद्यन्ते। भिन्न–भिन्न देशानुसारिशब्दाः प्रयुज्यन्ते तेषां साधुत्वज्ञानं सुगमतया न भवति। कुत्र? केन सह? केन रूपेण? वाग्व्यवहारः कर्तव्यः इति ज्ञानमपि निश्चितं न भवति, शब्दानां साधुत्वज्ञानार्थं तत्तद्विषयकाणि शब्दानुशासनात्मक शास्त्राणि लिखितानि सन्ति। तदनुसारि एव तत्तद् वाक्यव्यवहारो भवति। वाक्योपदेशो न केनापि कर्तुं शक्योऽस्ति। यतो हि प्राणिभिः कुत्र केनचित् सह कथं? वाग्–व्यवहारः कर्तव्योऽस्ति। कदा किं वक्तव्यमस्ति? इत्यादिकं ज्ञानं न कस्यचिन्वति। अत एव तत्तद् विषयकं शब्दशास्त्रं लिखितमस्ति। शब्द शास्त्रेषु यथार्थशब्दसाधुत्वप्रकारकज्ञानजनकाः नियमाः लिखिताः सन्ति। तदनुसारि शब्द प्रयोगोऽपि भवति। अस्माभिः साधु शब्दाः एव प्रयोक्तव्याः नासाधु शब्दाः



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

प्रयोक्तव्याः। साधु शब्द प्रयोगे एव धर्मः। एतदर्थमेव ऋषिभिः लिखितमस्ति वेदाङ्गेषु षट्स्वङ्गेषु प्रधानमखम् व्याकरणमेवास्ति। प्रधाने च कृतो यत्नः फलवान् भवति। अतएवोक्तमस्ति–

**"मुखं व्याकरणं स्मृतम्।"**

प्रयोजनान्यपि उक्तानि सन्ति व्याकरण महाभाष्ये।

संस्कृत वाङ्मये व्याकरणस्य किं स्वरूपं? कानि च तस्य प्रयोजनानि। वैयाकरणव्युत्पत्या व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्, वि आङ् पूर्वकात् कृ धातोः करणे ल्युट् प्रत्यये कृते सति व्याकरण शब्दो निष्पद्यते।

येन शास्त्रेण प्रकृति प्रत्यय विभागपूर्वकं शब्दानां व्युत्पत्तिः क्रियते तद् व्याकरणम्। व्युत्पत्या शब्दानां प्रामाणिकोऽर्थबोधः सम्पद्यते। अर्थबोधे एव शब्दानां प्रवृत्तिः। अत एव महाभाष्ये महर्षि पतञ्जलिना व्याकरणस्य शब्दानुशासनम् इत्यर्थः क्रियते। किं नाम शब्दानामनुशासनम्? तर्हि शुद्धयशुद्धि निर्धारणं व्याकरणाद् भवति अत एव व्याकरणमिव शब्दानामनुशासनम् इत्यर्थः। पश्चाद् महाभाष्ये अयं प्रश्न उत्थापितः कस्तर्हि शब्दः तस्य समाधानं भाष्ये–

**"येनोच्चारितेन सास्नालाखूलककुदखुरविषाणिनांसम्प्रत्ययो भवति सः शब्दः।"** यथा गो इति शब्देनोच्चारितेन तत्तदवयवविशिष्टस्य गो पदार्थस्य बोधो जायते। अथवा 'प्रतीतपदार्थको लोके ध्वनिः शब्दः।" लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धस्श्रोतेन्द्रिय ग्राह्यत्वात् वर्णरूपध्वनि समूहः एव शब्दः। यतो हि शब्द प्रयोगं विना व्यवहारे निर्वाहः सुतरां दुष्करः। विना शब्दं जगत्सर्वं मज्ञानावृतम् अन्धकाररूपमेव स्थास्यति यथा दण्डिना प्रोक्तं काव्यादर्शे–

**इदमन्ध तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न विद्यते।।** (काव्यादर्श, 1/34)

यदा रात्रौ सूर्य प्रकाशो न विद्यते चन्द्रमापि न प्रकाशते अग्नेरपि प्रकाशो न भवति सर्वथा अन्धकार प्रसार एव व्याप्तस्तिष्ठति, तदा वयं शब्दप्रकाशमाध्यमेनैवान्योन्यं जानीमः स्वर–संयोगेन तस्य परिचयोदूरादेव अभिजानीमः। किञ्चान्यैः प्रकाशैः बाह्यतमो निवृत्तावपि स्वान्तस्तमो निवृत्तिः शब्देनैव सम्भाव्यते। सर्वमपि ज्ञानं शब्दानुब(मेव मनसि बुद्धौ वा यदि ज्ञानानुशीलनं क्रियते तत् सर्वमपि सूक्ष्म शब्दरूपमेव भवति। तथा हि भर्तृहरिणा वाक्यपदीये उक्तम्–

**"न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।**
**अनुबिद्धमिव ज्ञानं सर्वं शब्देन भाषते।।** (वा.प.ब्र.का.)

एवं विधस्य शब्दस्य स्वरूप निर्धारणमर्थनिर्धारणञ्च व्याकरणादेव जायते। शक्तिग्रह पूर्वकं अर्थबोधः व्याकरणस्य प्राथम्यम्। अत एव शब्दखण्डे भर्तृहरिणा लिखितमस्ति—

**शक्तिग्रहो व्याकरणोपमान कोशाप्तवाक्याद् व्यवहारतश्च।**

**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य बृद्धाः।।**

(वा.प. शब्दखण्डे—)

अत्र शक्ति ग्राहक प्रमाणभूतेषु सर्वप्रथमं व्याकरणस्योल्लेखः तस्य प्रमुखतां विनक्ति। अत एव वेदानां अन्य शास्त्राणाञ्च निर्दुष्टार्थ बोधनिमित्तं व्याकरणाध्ययनं सुतरामपेक्षितं। महाभाष्ये अति दाढ़र्येन व्याकरणाध्ययनस्य प्रयोजनानि सन्दृब्धानि। यथा—

**"रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"**

(अ) **रक्षार्थं वेदानामध्येयं व्याकरणम्—** लोपागमवर्णविकारज्ञो हि वैयाकरणः सम्यग् वेदान् परिपालयिष्यति। अनेन वेदार्थावगमस्य रक्षापि अवान्तरं व्याकरण प्रयोजनं सूचितम्। अत एव अध्ययनमस्य न पाठमात्रं किन्तु वाक्यार्थावगतिपर्यन्तमन्यथा अर्थाज्ञानाद् वेद रक्षापि न स्यात्। अर्थ ज्ञाने सति तु शुद्ध तत्तन्मन्त्रैः विहित कर्मानुष्ठानेन स्वर्गसुखं उपनिषदर्थज्ञानेन मोक्षश्च व्याकरणाध्ययनस्य फलं भवति।

(ब) **ऊहः खल्वपि—** न सर्वैर्लिङ्गैः न च सर्वाभिर्विभक्तिभिर्वेद मन्त्राः निगदिताः। यज्ञगतेन पुरुषेण तेषु मन्त्रेषु यथोचितं कर्तव्यं भवति। नावैयाकरणः तत् परिवर्तनं कर्तुं शक्नोति। यथा—

**"अग्नये त्वा जुष्टं निर्वपामि इति।"** तत्र सौर्य चरुं निर्वपेत् ब्रह्मवर्चस कामः इति सौर्ये चरौ मन्त्रे ऊहः कर्तव्यः सूर्याय त्वा जुष्टं निर्वपामि इति तस्मादध्येयं व्याकरणम्।

(स) **आगमः खल्वपि—** ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति प्रधानं च षट्स्वङ्गेषु व्याकरणम्।

(द) **लध्वर्थं चाध्येयं व्याकरणम्—** ब्राह्मणेनावश्यं शब्दाः ज्ञेयाः इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुं। तस्मात् क्षिप्रं ज्ञानाय अध्येयं व्याकरणम्।

(य) **असन्देहार्थं च अध्येयं व्याकरणम्—** "याज्ञिकाः पठन्ति स्थूल पृषतीमग्निवारुणीमनड्—वाहीमालभेत्" इति तस्यां सन्देहोजायते—

(क) स्थूला चासौ पृषती स्थूल पृषती।





(ख) स्थूलानि पृषन्ति यस्या सेयं स्थूलपृषतीति तां नावैयाकरणः स्वरतोध्यवस्यति यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुब्रीही, अथ समासान्तो दात्तत्वं ततः तत्पुरुषः इति।

एवं पूर्वोक्त प्रयोजनानि उक्त्वा अन्यान्यपि व्याकरणाध्ययनस्य प्रयोजनानि महर्षि पतञ्जलिना प्रोक्तानि यथा—

**"इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि—**तेऽसुराः। दुष्टः शब्दः। यदधीतं। यस्तु प्रयुङ्क्ते अविद्वाँसः। विभक्तिं कुर्वन्ति यो वा इमाम्। चत्वारि। उतत्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति।

(अ) **तेऽसुराः—** तेऽसुरा हेलयो इति हेलय कुर्वन्तः पराबभूवुः। तस्माद् ब्राह्मणेन, न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा एष यदप शब्दः। म्लेच्छा मा भूम इत्यध्येयं व्याकरणम्। एवं अपशब्दस्य परिहारार्थं व्याकरणस्य अध्ययनं कर्तव्यम्।

(आ) **दुष्टः शब्दः—** दुष्टः शब्दः स्वरतो वर्णतो वा, मिथ्या प्रयुक्तो न तमर्थमाह।

**"स वाग्वज्रो यजमानं हिनस्ति, यथेन्द्र शत्रुः स्वरतोऽपराधात्।**

(म.भाष्य प्रथम आह्निक)

त्वष्टा किल् इन्द्रमारणार्थमभिचार यज्ञं अकरोत्। स मन्त्रं प्रयुक्तवान्। "इन्द्र शत्रो बर्धस्व इति।" तत्र इन्द्रस्य शत्रुः इन्द्रशत्रुः इन्द्रस्य शातयिता इत्यर्थः। एवं तत्पुरुषे कृते सति अन्तोदात्त प्रयोगो भवति। इन्द्रः शत्रुः शातयिता यस्य सः इन्द्र शत्रुः इति बहुब्रीहि प्रयोगः कृते सति आद्युदात्त स्वरो भवति। त्वष्ट्रा अन्तोदात्ते प्रयोक्तव्ये आद्युदात्त स्वरयुक्तो मन्त्रः प्रयुक्तः तेन स्वरदोषेण इन्द्रेण हन्तुं योग्यः वृत्रासुरः समुत्पन्नः त्वं च जघान।

एवं स्वर वैपरीत्येन "स वाग्वज्रो यजमानं हिनस्ति" इत्यनुसारं सम्प्रल्प्य प्रतिकूल वृत्रासुरः इन्द्रेण विनाशितः। अत एव स्वरादिदोष परिहारार्थं अभीष्टफल प्राप्तये व्याकरणस्याध्ययनं कर्तव्यम् इति।

(इ) **यदधीतम्—**

**यदधीतमविज्ञातं निगदेनैव शब्द्यते।**

**अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।।** (वा.प.)

तस्मादनर्थकं माधिगीष्ममहीत्यध्येयं व्याकरणम्। अर्थज्ञानं विना केवलं पाठमात्रेण प्रयुक्तो मन्त्रः निष्फलो भवति, तस्मात् मन्त्रार्थज्ञानाय व्याकरणस्याध्ययनं कर्तव्यम्।

(ई) **यस्तु प्रयुङ्क्ते—**

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17 ISSN 0976-8645

**यस्तु प्रयुङ्क्तेः कुशलो विशेषे, शब्दान्यथावद् व्यवहार काले।**

**सोऽनन्तमाप्नोति जयं परत्र, वाग् योगविद् दुष्यति चापशब्दैः।।**

यो वैयाकरणः शब्दप्रयोगे कुशलः यथावत् शब्द व्यवहारं करोति। स अनन्तं जयं प्राप्नोति। यतः स अवाग्योगविद् व्याकरणज्ञानरहितः स अपशब्दैः दोषं प्राप्नोति। यथोक्तम्—

**''एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुक् भवति।''**

(उ) **अविद्वाँसः—**

**अविद्वाँसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः।**

**कामं तेषु तु विप्रोऽस्य स्त्रीष्विवायमहं वदेत्।।** (महाभाष्य प्रथम आह्निक)

अभिवादने स्त्रीवन् मा भूम इत्यध्येयं व्याकरणम्। प्रत्यभिवादने हि गुरुणा कृतः कार्यः। यस्तु प्लुतं कर्तुं न जानाति स स्त्रीवत् अयमहमिति वक्तव्यः। अस्य दोषस्य परिहारार्थं व्याकरणस्याध्ययनं कर्तव्यम्। यथा मनुना उक्तम्—

**(ऊ) विभक्तिं कुर्वन्ति—** याज्ञिकाः पठन्ति प्रयाजाः स विभक्तिकाः कार्याः इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुं, तस्माद् विभक्ति ज्ञानाय व्याकरणस्याध्ययनं कर्तव्यम्।

**(ऋ) यो वा इमाम्—** 'यो वा इयं पदशः स्वरशोऽक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति'' आर्त्विजीनाःस्यामेत्यध्येयं व्याकरणम्।

**(लृ) चत्वारि—** चत्वारि शृंगा त्रयो अस्य पादा, द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्या आविवेश इति।।

चत्वारि शृंगाणि। चत्वारि पदजातानि नामाख्यातोपसर्ग निपातश्च, त्रयः कालाः भूत—भविष्यत वर्तमानाः द्वे शीर्षे। द्वौ शब्दात्मानो नित्यः कार्यश्च सप्त हस्तासो अस्य। सप्त विभक्तयः त्रिधा बद्धः। वृषभो। वर्षणात् रोरवीति इति शब्दं करोति। महो देवो मर्त्या आविवेश। महान् देव शब्दः मर्त्या मरण धर्माणो मनुष्यास्तान आविवेश।

**उपसंहार—** व्याकरणाध्ययनस्य यानि प्रयोजनानि उक्तानि सन्ति तानि सर्वाणि संस्कृत शब्दानामेव सन्ति। यतो हि शब्द पदेन संस्कृत शब्दानामेव ग्रहणं भवति। तेषामेव शब्दप्रयोगादेव पुण्यजनकता भवति। यद्यपि लोके साधु असाधु शब्देभ्योऽपि अर्थबोधः समानेव भवति तथापि साधुशब्दप्रयोगे एव पुण्यजनकतावच्छेदक धर्मः। असाधुशब्दप्रयोगात् तु तथैवार्थं बोधो भवति। परन्तु तत्र पूर्ण जनकतावच्छेक धर्मो नास्ति। उक्तञ्च व्याकरणमहाभाष्ये भगवता पतञ्जलिना—



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal]
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17 ISSN 0976-8645

समानायामर्थावगतौ शब्दैश्चापशब्दैश्च, तत्र शास्त्रेण धर्मानियमः क्रियते, नियमश्च पुण्य—पापयोः साधुशब्दप्रयोगादेव पुण्यनियमः न त्व साधुशब्द प्रयोगात्। यद्यपि लोके वाग्व्यवहारार्थं बहुविध भाषाणां प्रयोगो भवति, तथापि तासु भाषासु ये शब्दाः प्रयुक्ताः सन्ति तेऽपि तत्तद्भाषानुसारिणो नियमानुसारिणश्च भवन्ति। तत्रापि साधु शब्द प्रयोगार्थं बहुविध विशालाः नियमाः लिखिताः सन्ति। ते तु मात्र व्यवहार विषया एव भवन्ति। न तत्र पुण्यजनकत्वमस्ति। पुण्यजनकत्वं मात्र संस्कृत शब्देष्वेवास्ति।'

अत एव ये शब्दा अस्माभिः प्रयोक्तव्याः सन्ति ते साधु शब्दा एव प्रयोक्तव्याः नापशब्दाः प्रयोक्तव्याः। वेदेषु, वेदाङ्गेषु, पुराणादिषु काव्यादिषु च ये विषया वर्णिताः सन्ति तत्तद्विषय बोधनाय तत्तद् ग्रन्थेषु संस्कृत शब्दा एव प्रयुक्ताः सन्ति। तेषामेव पाठादेव सर्वाभीष्टसिद्धिर्भवति। अत एव सर्वैः संस्कृत शब्दा एव प्रयोक्तव्याः स्वाभीष्ट सिद्धयर्थम्। स्वाभीष्ट सिद्धिरेव सर्वेषामिष्टिरस्ति।

## सन्दर्भग्रन्थसूची

1. वैयाकरणसिद्धान्तकौमुदी, श्रीमद्भट्टोजिदीक्षितः(सम्पा.-श्रीगोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन, वाराणसी, 2004
2. शब्दकल्पद्रुमः.राधाकान्त देव बाहादुर,ओरिएंटल् बुक् सेन्टर ,दिल्ली, 2002

ISSN 0976-8645

# गौतमबुद्धदृष्ट्या दुःखनिरोधः

**देवब्रतनाएकः**[45]
[संस्कृतविभागःपाण्डिच्चेरी-विश्वविद्यालयः]

दुःखानां निरतिशयनिवृत्तिपूर्वकं परमानन्दस्योपलब्धिः सर्वेषांभारतीयदर्शनानामेकमात्रं उद्देश्यम् । आध्यात्मिकाधिभौतिकाधिदैविकभेदेन दुःखानां त्रैविध्यं तत्तदार्शनिकैः प्रतिपादितम् ।एतेषां दुःखत्रयाणामात्यन्तिकनिवृत्तिः परमात्मतत्तवस्य दर्शनमेव दर्शनशास्त्रस्य परमं लक्ष्यम् । भगवता बुद्धेन त्रिविधदुःखानामात्यन्तिकनिवृत्त्यर्थ चतुर्णामार्यसत्यणामान्वेषणं कृतम् । तानि आर्यसत्यानि यथा–दुःखम्, दुःखकारणम्, दुःखनिरोधः, दुःखनिरोधमार्गश्चेति । एतेषां आर्यसत्यचतुष्टयानामान्वेषणम आर्यविद्वांसाः एव कर्तुं समर्थाः । साधारणजनाः जीवन्ति, मृत्युमधिगच्छन्ति, दुःखमयस्य जगतः स्वरूपं प्रतिक्षणमनुभवन्ति च , परन्त्वेतेषां सत्यचतुष्टयानामान्वेषणं कर्तुमसमर्थाः भवन्ति ते । आर्याः सांसारिकदुःखानां सत्ता सुतरामनुभवन्ति । योगसूत्रेऽपि सूत्रकारेण एतस्यसमर्थकपूर्वकं स्पष्टमुक्तं यत् – परिणामतापसंस्कारदुःखैगुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः इति ।

येषां सत्यचतुष्टयानां रहस्यावबोधार्थं आर्याः (विद्वासाः) समर्थाः बौद्धदर्शने तेषामार्यसत्यचतुष्टयमिति नाम्ना परिगणनम् । येषामार्यसत्यचतुष्टयानामान्वेषणं गौतमबुद्धेन कृतं तेषां नामानि यथा –

1. सर्वं दुःखम् ।
2. दुःखसमुदयः ।
3. दुःखनिरोधः ।
4. दुःखनिरोधगामिनी प्रतिपद् इति ।

**दुःखनिरोधः** -
रात्रौ प्रथमे गौतमस्य यत् सत्यविषयकं ज्ञानं जातं तत् दुःखनिरोधरूपं तृतीयमार्यसत्यम् । दुःखनाशः दुःखत्यागो वेत्यस्य नामन्तरम् । बौद्धदर्शने दुःखनिवृत्तेः निर्वाणमित्यपि नामान्तरं “निर्गतो वाणः तापो यस्मात् ततः निर्वाणम्” इति तस्य ब्युत्पत्तिः । निर्वाणं नाम शोकजन्यकायिकवाचिक – मानसिकादिसमस्तसन्तापानां शान्तिः । निर्वाणं प्राप्यान्तरं प्रकृत्याः सर्वविधबन्धनाद्विमुक्तः सन् दुःखतितः भवति जीवः । अतोक्तम् – निर्वाणमेव दुःखानामौषधमिति ।

[45] डाँ.अनिलप्रतापगिरिश्च




ISSN 0976-8645

निर्वाणशब्दस्यार्थः निर्वापनम् । यथा प्रदीपस्य एकः विच्छिन्नः प्रवाहः प्रचलति तथा चित्तसन्ततेरपि एका विच्छिन्ना धारा प्रवहिता भवति । नैरात्म्यधर्मतायाः साक्षात्कारेण तृष्णादिनां विनाशानन्तरं जरामरणरूपस्य संसारस्य नाशात् प्रदीपवत् चित्तसन्ततेरर्गिमचित्तस्य जन्मभाव तस्य निर्वाणम् ।

बौद्धदर्शने अध्यात्मिकानुभवस्यैका अवस्थारूपेण निर्वाणस्य ग्रहणम् । जीवनं एकावास्तविकता, एकः दृष्टधर्मः, एकं दृष्टं वस्तु । जीवनस्य विशुद्धिरेव विमुक्तरूपेण साधकस्य कृते प्रकटिता भवति । जीवनस्य विशुद्धिः निर्वाणरूपा विशुद्धिरेव निर्वाणम् । साध्यसाधनयोरेकता एव वौद्धधर्मस्य मूलम् । आस्रवाणां ( चित्तमलानां ) क्षयेन आस्रवरहितचित्तस्य विमुक्तौ (प्रज्ञाविमुक्तौ) स्वजीवनस्य साक्षात्कारः भवति । साधकानां कृते जगद्विषयकोयमुपदेशः निर्वाणरूपेणादिगतोऽभूत् । वस्तुतः अहं भावस्य विसर्जनपूर्वकं पुरुषस्य महासुखावस्थाप्राप्तेर्नाम निर्वाणम् । निर्वाणं दुःखविमुक्तत्यवस्था परमसुखावस्था वा । निर्वाणं धर्मस्य सम्यग्दर्शनेन उत्पद्यते । निर्वाणं निर्वाषयस्य मनसः आनन्दः । एवम्भूतस्य सुखस्यानुभवपूर्वकमन्नपानब्यतिरेकेण एकस्मिन्नासने समाध्यवस्थायां तथागतेन बहुकालातिवाहितम् । समयोस्मिन् मगध राज्यस्य राज्ञः बिम्बिसारापेक्षयप्यधिकं सुखं तेनानुभूतम् । थेरीगाथायां स्वस्यनिर्वाणप्राप्तेः सूचना प्रदानावसरे सम्मुलासपूर्वकं तेन उक्तं यद् “निर्वाणंप्राप्य अहं परमशान्तिमनुभवामि निर्वृत्तः सन् शीतलता स्वरूपमधिगच्छमिति । अतस्तन्मते परमशान्तिरेव निर्वाणमिति ।

तथागतेनोक्तं यथा लवणं महासमुद्रस्य एकमात्रं रसः तथा विमुक्तः तदुपदिष्ट धम्मविनयस्याप्येकमात्रं रसः भवति । अत्र विमुक्ति शब्दस्यार्थः चित्तविमुक्तिरिति । तन्मते चित्तविमुक्तिः ब्रह्मचर्यस्यान्तिमोद्येश्यम् । पुनरुक्तिपूर्वकं तथागतेन धातु विभागं – सत्तन्ते तथागतेनोक्तम् “भिक्षु । यही परम आर्यसत्य है जो कि यह अविनाशी निर्वाणं ” इति ।

तथागतबुद्धेन जन्म – जरा – मरण– दुःख – शोकाद्विमुक्तिः निर्वाणरूपेणाधिगता । तन्मते निर्वाणमात्यन्तिक दुःखाद्विमुक्त्यवस्था या खलु तस्य मृत्युरुपरि विजयः आसीत् । अतः पालित्रिपिटकेषु निर्वाणमेवामृतपदमिति वहुवारं प्रतिपादितमस्ति । तथागतेन “मया अमृतमधिगतमिति”शब्दैः संसारस्य कृते सर्वप्रथमतः स्वस्य सत्यप्राप्ति विषयिकी सूचना प्रदत्ता आसीत् । अमृतत्वप्राप्त्यर्थं मध्यममार्गस्योपदेशः तेन प्रदत्तः वोधि प्राप्त्यानन्तरं अमृतत्वस्य द्वारमुन्मुक्तमभूदिति तस्य प्रथमोद्गारः आसीत् । वस्तुतः बुद्धशासनममृतत्वस्यैव द्वारमासीत् यत्र ज्ञानेन स्नात्वा पुरुषः प्रविशति, परन्तु किमेतदमृतम् , बुद्धशासनपरिभाषायां रागद्वेषमोक्षाणाक्षय एवामृतमिति । तथागतमतेन निर्वाणमेकः रमणीयः भूभागः आर्याष्टाङ्गिकमार्ग एव तत्र गमननिमित्तः प्रशस्तः । उपमाप्रदानच्छलेन तेनोक्तं यत् शरीरं राज्ञः नगर सदृशं यस्य इन्द्रियसदृशानि षडायतानि द्वारपालः, मनश्च राजा । मनसदृशस्य राज्ञः द्वै सन्देशवाहकौ सत्यस्य सन्देशप्रदानार्थं आर्याष्टाङ्गिक मार्गेण मनागमनं करुतः । आर्यष्टाङ्गिकमार्गेण निर्वाणरूपकस्य सत्यस्य सन्देशप्रदानार्थं गमनागमनं करुतः । अत्र उपमान प्रदान व्याजेन गौतमबुद्धेन एतद् एव प्रदर्शितं यत् तस्य सन्देशः निर्वाणस्यैव, आर्याष्टाङ्गिकस्तस्य मार्ग इति ।

अतः सदैव निर्वाणं परमसुखं परमशान्तिः चित्तविमुक्तिः अमृतपदं वा यस्य प्राप्त्यर्थं तथागतेन आर्याष्टाङ्गिकमार्गस्योपदेशः प्रदत्तः आसीत् । रागद्वैषमोहानां क्षयः निर्वाणम् । रागद्वैषमोहाः संसारस्याकुशलमूलाः भवन्ति । एतैरनुविद्धं चित्तं न कदाचित् सुखमधिगच्छति, शान्तिं वा भवति । अतः तृष्णाक्षयमपि निर्वाणमित्युक्तम् ।
स्वभावतः तृष्णाक्षयात् संसारस्य निरोधः भवति । अतः स्वयं तथागतेन भवनिरोध एव निर्वाणमित्युक्तम् ।

निर्वाणप्राप्तस्य जनस्य कृते न किमप्यवशिस्यते निर्वेदं प्राप्य विरक्तः सन् अहं विमुक्तः इति ज्ञानोत्पनेन जन्म क्षीणः जातः ब्रह्मचर्यवासः सम्पूर्ण अभूत् , कर्त्तव्यं कर्म सम्पादितः, इदानीं न किञ्चिदवशिष्यते इति ज्ञानं भवति । एवं सुखमयं शान्तं पदं प्राप्नोति । एतदेवतस्य अन्तिमशरीरम् । यस्य पतनमसम्भवम् । निर्वाणस्य साक्षात्कारः अस्मिन्नेव जीवने सम्भवति, न तु कालान्तरेषु तदधिगम्यते ।

निर्वाणमद्वितीययोगक्षेमः । अयं लोकः अशरण इति येन प्रोक्त । अत्र कुत्र त्राणम् कुत्र वा क्षेमः इत्यस्यान्वेषणं तेन स्वयमेवकृत्वा परिशेषे तेन निर्वाणरूपेण तदधिगतम् । उक्तञ्च तेन – यः अद्वितीययोगक्षेमः धीरपुरुषः सः निर्वाणे प्रविशति इति । उक्तञ्च "इच्छासकासात् रागाच्च विरतः प्रज्ञावान् नरः भिक्षुरमृतशान्तियुक्ताच्युतपदं निर्वाणं प्राप्नोति" इति ।

अतः श्रुति-स्मृति विज्ञानेन रागस्यापसरणमेवाच्युतपदमिति ज्ञात्वा स्मृत्वा च अस्मिन्नेव जन्मनि निर्वाणमप्राप्योपशान्तः भवति । लोके तृष्णामतिकामति च ।
निर्वाणं शिवपदं नाम शिवस्य स्थानम् । तथागतेनात्यन्तसार्थकतापूर्वकमुक्तं यत् अजरामरयाविनाश एव निर्वाणमिति ।

संक्षेपतः किं नाम निर्वाणम् इति प्रश्नस्योत्तरम् एसेंवन्तों दुक्खरसाति इति । अत्रायं भावः – दुखनामन्तोऽस्ति । ऋणिपुरुषस्य ऋणपरिशोधानन्तरं या प्रशन्नता, रोगग्रस्थस्यारोग्यानन्तरं यत्सुखप्राप्तिः, बन्धनात् दासाच्च विमुक्त्यनन्तरं यः सुखाधिगमः तत् सुखं भवबन्धनाद्विमुक्त्येनन्तरमधिगच्छति तृष्णाविमुक्तः पुरुषः । उक्तञ्च तथागतेन"सब्बं आदित्तः" इति ।

नाम – रूपं – चक्षुः – चक्षुविज्ञानम् – सुखम् – दुःखम् – वेदना –श्रोत्रम् – घ्राणम् – कायः – नासिका – शब्दः – स्पर्शः रागः इत्यादयः सर्वं किञ्चित् प्रज्वलितं भवति । पञ्चोपादानस्कन्धा अपि प्रज्वलिताः भवन्ति । परन्तु केन अग्निना तत्रोत्तरं रागद्वेशमोहाग्निना इति ।इन्द्रियामामास्वादनमिति यत् कथयामः वयं वस्तुतः तदेव ज्वलनं नास्ति तत्र चित्तस्य शान्तिः ।ज्ञानिदृष्या सर्वं किञ्चिद्दुखात्मकम् । एतत् सर्वं परितेज्य अनित्य दुःख – अनात्म दृष्टेरपसारणपूर्वकममृतपदम्प्रति चित्तस्यसंयमेन निर्वाणरूपकस्य सत्यस्य साक्षात्कारः भवति । रागद्वेषमोहाग्निनमुपशन्त्या या शीतलताप्राप्तिः तदेव निर्वाणमिति । उक्तञ्च यथा संस्काराणामुपसमेन सर्वोपाधिनां परित्यागेन तृष्णाक्षयेन विरागेणचाधिगमनः निरोधरूपं निर्वाणमुत्तमशान्तिः प्रददाति । सर्वाधिकामनासकासान्निवेदं प्राप्य यः साधकपुरुषः वासच्यूतः सन् प्रवज्याम प्राप्नोति सः निर्वाण सदृश सुखमधिगच्छति ।





उपर्युक्तविवेचनेनैतज्ज्ञायते यत् प्रारम्भिकवौद्धसाधनायां निर्वाणमाध्यात्मिकानुभवस्योच्चतम – स्वभावरूपमासीत् । यत् तु ब्रह्मचर्यवासश्यान्ति मोद्देश्यमिति । परन्तु परमार्थातीतसत्यरबपेणापि निर्वाणोस्योपदेशप्रदानावसरे तथागतेनोक्तं यत् –"निब्बाणं परमं वदन्ति बुदधा" इति । तस्योऽयमुपदेशः तत्त्वदर्शनदृष्ट्या अत्यन्तं महत्वपूर्णः । गौतमबुद्धमतेन यथा तैल – वार्त्तिकादिनां सद्भावे प्रदीपः प्रज्वलितः भवति । तयोरभावेचोपशान्तः भवति सः, तथा शरीरस्य विनाशान्तरं मरणानन्तरं वा अनासक्तः सन् वेदनाया अनुभवाभावन्निर्वाणमधिगम्यते ।

तथागतबुद्धमतेन निर्वाणं तदेवायतनं यत्र न पृथिवी, न जलम्, न तेजः, न वायुः, नाकाशञ्चायतनं, न नेवसञ्ज्ञानासञ्ज्ञायतनम्वास्ति । तत्र न इहलोकः, न परलोकः, न सूर्यः, न वा चन्द्रोऽस्ति, निर्वाणं नागतिः, न स्थितिः, न वा तस्याधारोऽस्ति निर्वाणं केवलं दुःखानामन्तस्थानमिति । निर्वाणस्य सद्भावादस्य जगतः अनुभूति असीमसत्तायाः असीमतैव सर्वोत्कृष्टं प्रमाणम् । अजाताभूताकृता-संस्कृतभावे जात – भूत – कृत – संस्कृतानां निःसरणं न स्यात् निर्वाणं परमतीतसत्यं यस्य न किमप्यधिष्ठानमस्ति । निर्वाणमन्तिं सत्यम् । तस्याग्रे नेति नेति अस्ति । अथत आदेशो नेति – नेति इत्योपनिषद्दर्शने केवलं ब्रह्मणः यदधिष्ठानत्वमेवोक्तं तदेव बौद्धदर्शने निर्वाणक्षेत्रे अप्युक्तमिति । निर्वाणं सत्यमविनाशितत्वञ्च । तथागतेन स्पष्टमुक्तं – यद्विनाशशालं तदसत्यम् यच्चाविनाशी तन्निर्वाजमिति । अतः निर्वाणममोषधर्मा अविनाशीतत्वञ्च । निर्वाणस्योच्छेदः नास्ति ।निर्वाणं केवलं तृष्णरूपकस्याग्नेरुच्छेदः, कामरूपस्याग्नेः निर्वापनम्वा कामतृष्णायाः निरोधेन उपादानान्येपि स्वतः एव निरुद्धानि भवन्ति । उपादाननिरोधेन भवनिरोधः, भवनिरुद्धेन जन्मनिरोधः, जन्मनिरुद्धेन जरा – मरण – रोग – शोक – पीडा – चिन्ता प्रभृतीनामपि निरोधः । एवं प्रतीत्यसमुत्पादस्य निर्वाणे एव परिसमाप्तिः । * उपर्युक्तविवेचनेनैतत्स्पष्टं यत् निर्वाण विषये बुद्धस्य दृष्टिः सम्पूर्णतः व्यावहारिकी । अतस्तेन निर्वाणस्य केवलं निषेधात्मक पक्षं विचारितम् । तन्मते रागद्वेषाणां क्षयपूर्वक जरामरणचक्रस्य गत्यभाव एव निर्वाणम् , नत्वात्मनः विनाशः । वस्तुतः बौद्धाः आत्मोति न कस्यापि नित्यवस्तुनः अस्तित्वं स्वीकुर्वन्ति अतोऽनित्यचित्तस्य निर्वाणं स्वीकुर्वन्त ते, न तु नित्यस्यात्मनः । तेषां मते चित्तस्यैव मुक्ति भवति । तेषां मते रागादिनां संसरणवसात् जन्ममरणरूपसंसारे वद्धजीवः मुक्त भवति । रागादिवसात् नित्यस्यात्मनः संसारे बन्धनमसम्भवम्, अविकार्यत्वात् नित्यस्य कर्मवशाज्जायमानस्य संस्कारस्य क्षयः । निर्वाणमित्युच्यभावात्मकरूपेण निर्वाणं नैतिकपूर्णत्वस्येयं स्थितिः यत्र तृष्णायाः क्षय भवति ।

श्रीमद्भागवद्गीतोक्त – स्थितप्रज्ञेन सह बोधेः तुलनं कर्तुं सक्यते । एते मोक्षानन्तरं संसारत्यागं न कुर्वन्ति, अपि तु लोककल्याणार्थं कार्यं कुर्वन्ति । एतेन जीवधारिणां निर्वाणार्थं मार्गः प्रशस्थः भवति । यदा सर्वेजीवाः निर्वाणप्राप्त्येर्थं योग्याः भवन्ति । तदैव केवलं बोधिसत्व निर्वाणमधिगच्छति । एवं भूतस्य लक्षस्य प्राप्त्यर्थं तथागतबुद्धेन चतुर्थमार्यसत्यं निर्वाप्राप्तेरपायत्वेन प्रोक्तं। उपादिरोष अनुपाधिशेष भेदेन निर्वाणं भागद्वयेन विभक्तम् । तथागतबुद्धस्य जीवन्मुक्तौ विश्वासः आसीत् । तन्मते रागद्वेषमोहानां क्षयः निर्वाणम् । एतेषां क्षयव्यतिरेकेण शरीरत्योऽप्यसम्भवः अतः यदि निर्वाणं प्राप्य मनुष्यः शरीरमपि त्यजति चेत्तर्हि तस्यायं निर्वाणमनुपाधिशेष परिनिर्वाणं वेच्युच्यते ।

**सन्दर्भसूचीः –**


1. दुखानामौषधं निर्वाणम् –चार्वाक् सूत्र – 1.69 ।
2. निब्बानं परमं सुखं ।मालुक्यसुत्तन्त (मज्झिनिकायः-2/3/5 )धम्मपद -15/8
   निब्बानं सुखा परं नत्थि । थेरीगाथा – पृ.476
3. अमानुसी रती होति सम्मा धम्मं विपस्सतो । धम्मपद -20/14( वि)
4. उदान।बाधिवर्ग
5. चूल दुक्ख क्खन्ध- सुत्तन्त–– (मज्झिनिकायः – 1/2/4 )
6. थेरीगाथा- 15,16,34,66,76,101 ।
7. सेय्यथापि भिक्खवे महासमुछो एकरसो, एवमेव स्व भिक्खवे अयं धम्मविनयो एक रसो विमुत्ति रसो । ( विनयपिटक चालुक्यवग्गः)
8. महासारोपमसुत्तन्त ( मज्झिमनिकायः -1/3/9), चूलसारोपमसुत्तन्त(मज्झिमनिकायः -1/3/10 )
9. धातुविभंगसुत्तन्त – 3/4/10
10. विनयपटिक –महावग्गः
11. सुत्तनिपात –पृ.8 तथा 39-40 ।
12. विनयपटिक – अरियपरियेसनसुत्र ( मज्झिमनिकायः – 1/3/6)
13. संयुक्तनिकाय– पृ. 8 ।
14. अंगुतरनिकायः- पृ.46 ।
15. संयुक्तनिकाय–पृ.194।
16. तण्हाय विप्पहामेन निब्बाणं इति बुचति इति ।( सुत्तनिपात–पारायणवग्गा)
17. संयुक्तनिकाय – पृ.117
18. बुद्धचर्चा -392-393
19. अधिगच्छे पदं सन्तं संखारूपसमं सुख । धम्मपद -25/22
20. अन्तिमोयं समुस्सयो । धम्मपद - 24/18
21. अभब्बो परिहानाय । धम्मपद -2/2
22. फुसन्ति धीरा निब्बानं योगक्खेमं अनुत्तरं । धम्मपद– 2/3
23. इघ दिटठसुतमुतविञ्ञातेसु पियरूपेसु हेमका छन्दराग विनोदं निब्बाणपदमच्युतं इति ।
    सुत्तनिपात – 5/9
24. सुत्तनिपात – 5/9
25. थेरीगाथा –गाथा -137
26. सुत्तनिपात – 5/11
27. महाअस्सपुरसुत्तन्त – 1/4/9
28. आदित्यपरियायसुत्त – (संयुक्तनिकायः), विनयपिटकमहावाग्गाः
29. महामालुक्यसुत्तन्त –( मज्झिमनिकायः – 2/2/4)







30. निब्बाणपदभिपत्थमानो सम्मा सो लोके परिब्बजेय्य – तत्रैव ।
31. निब्बाणपदभिपत्थमानो सम्मा सो लोके परिब्बजेय्य – तत्रैव ।
32. धम्मपद -14/6
33. सुत्तन्त ( मज्झिमनिकायः – 1/3/1)
34. उदान, पाटिलिगामियवग्गः
35. उदान, पाटिलिगामियवग्गः
36. धातुविभंगसुत्तन्त – मज्झिमनिकायः – 3/4/10
37. सुत्तनिपात (पारायणवग्गः)
38. अभिधमत्थ संग्रहः – पृ.124
39. दीघनिकायः – पृ.74


**सन्दर्भग्रन्थसूची**


1. दुःख निरोधः, लेखकः – ओशो, प्रकाशनम् –HindaPoketaBuksa, वर्षः - 2006 .
2. गौतमबुद्ध जीवन और दर्शन – लेखकः –सर्वपल्लि राधाक्रिष्णान्, प्रकाशनम् –Kindle Edition, वर्षः – 31 December 1899.
3. The Numerical Discourse of the Budha. Translated by Bhikku Bodhi, Published by Wisdom Publication, Year – 16th October 2012.
4. Buddha – His Life and Teaching , Author – Gautamabuddha, Published by Axiom, Year – 2003.
5. The Dhammapada : A Buddhist Classic (Illustrated) by Gautamabudha, Published -13 February 2012.

# वेदेषु सूर्यविज्ञानम्

**श्रीब्रजेशकुमारझा**

[शोधच्छात्रः, श्री लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली]

विदन्त्येव भवन्तस्सर्वे यद्वेदा एव विश्वकल्याणस्योद्बोधकाः, सर्वेषामपि चराचराणां हितचिन्तकाः, परब्रह्मपरमात्मनो निःश्वासभूताः विविधज्ञानविज्ञानसिद्धान्त- परिपुष्टाश्च सन्ति।

वेदानां षडङ्गानि प्रोक्तानि। तेषां समग्राङ्गानां सम्पूर्णब्रह्माण्डेन सह गहनसम्बन्धो वर्तते। तस्मान्नित्यानन्तस्वरूपाणामलौकिकोपायबोधकानां शब्दब्रह्मरूपाणां वेदमन्त्राणां साक्षात्कारो जन्मजन्मान्तरेषु कृतभूरिपरिश्रमेण तपोबलेन च ऋषयः कृतवन्तः। अत्र वेदेषु सूर्यविज्ञानम् इति विषयवस्तु प्रतिपादनमस्ति।

वेदानां षडङ्गानि प्रोक्तानि। तेषां समग्राङ्गानां सम्पूर्णब्रह्माण्डेन सह गहनसम्बन्धो वर्तते। तस्मान्नित्यानन्तस्वरूपाणामलौकिकोपायबोधकानां शब्दब्रह्मरूपाणां वेदमन्त्राणां साक्षात्कारो जन्मजन्मान्तरेषु कृतभूरिपरिश्रमेण तपोबलेन च ऋषयः कृतवन्तः। यथोक्तं वेदव्यासेन–

**युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।**

**लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा॥**[46]

महर्षिभिस्साक्षात्कृताः वेदाः महाप्रलयादिस्वपि परब्रह्मपरमात्मनः प्राणप्रक्रियायां सदा विद्यमानाः भवन्त्येव। कृष्णाजिनेषूवविष्टा ऋषयः **तद्ब्रह्मेत्युपासीत। ब्रह्मवान् भवति।**[47] इति तैत्तिरीयश्रुतिवचनात् तपसः प्रभावात् परब्रह्माणं समुपास्य ज्ञात्वा (बह्मभूः) तद्रूदेव भवन्ति। फलतः परमात्मनो निःश्वासमाध्यमेन उच्चार्यमाणानां वेदमन्त्राणां श्रवणं (दर्शनं) कृत्वा ऋषयः तत्त्वतोऽर्थप्रकाशनपूर्वकं निजशिष्यानुपदिष्टवन्तः। यथोक्तं यास्केन– **तद्यदेनांस्तपस्यमानान् ब्रह्मस्वयम्भ्वभ्यानर्षत्त ऋषयोऽभवंस्तदृषीणामृषित्वमिति विज्ञायते।**[48] ऋग्वेदेऽपि च–**यज्ञेन वाचः पदवीयमायंस्तामन्वविन्दन् ऋषिषु प्रविष्टाम्**[49] इत्थं वेदाः सन्त्यनन्ता अनादयश्च। तेषु नित्यानन्तज्ञानविज्ञानमयेषु वेदेषु विविधवैज्ञानिकरहस्यानां प्रतिपादनं कृतमस्ति। गूढार्थबोधनपुरस्सरं

[46] ऐ॰ ब्रा॰ सा॰ भा॰ उपोद्घाते
[47] तै. उप. ३.१०.४
[48] निरुक्ते–अ॰,२. पा–३, खण्ड– १२
[49] ऋ॰ वे॰ १०.७१.३





तत्तत्तात्विकचिन्तनस्य प्रकाशनमावश्यकं खलु। तेषु चिन्तनेषु विविधवैज्ञानिकाः सिद्धान्ताः प्रचुरतया वर्णिताः सन्ति। तस्मिन्नेव क्रमे **वेदेषु सूर्यविज्ञानविषयकं वैज्ञानिकं** विवेचनमत्यन्तमुपादेयत्वेन विवृतमस्ति।

**सूर्य आत्मा जगतस्तस्थुषश्च**[50] सूर्यः न केवलं वैदिकदेवता एवापितु महत्तत्त्वरूपेण वेदषु व्याख्यातोऽस्ति। नभोमण्डले विद्यमानानां सर्वेषामपि ग्रहोपग्रहाणां नियन्ता सूर्य एवोक्तः। सः स्वकीयेनैव बलेन भूराकाशादीन् आकर्षणशक्त्या स्तम्भितं कुर्वन् अस्ति। स एवास्य चराचरजगतः प्राणशक्तिरस्ति। **सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्**[51] सोऽयं सूर्यः अनेकविधोऽस्ति परमात्मनः आनन्त्यात इति्। अयं सूर्यः परब्रह्मणः त्रिविधरूपेषु एकोऽन्यतमः। स पूर्णब्रह्मपरमेश्वरः ओमकारस्वरूपः वर्तते। तत्र ओमकारे यत् त्र्यक्षरः अ–उ–म् इति, तस्य त्र्यक्षरस्य द्योतकाः इमे अग्निवायुखश्च सन्ति। अग्नितत्त्वं, वायुतत्त्वं, सूर्यतत्त्वं च संयुक्तभावेन परब्रह्मणि तिष्ठति। तस्मात् परमात्मनः सदा विद्यमानत्वात् उभे त्रयो देवा अपि सदा विद्यमाना एव भवन्ति। यथाः–

**अपाꣳ रसमुद्वयसꣳ सूर्ये सन्तꣳ समाहितम्।**

**अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तमम्॥**[52]

अर्थात् या एताः आन्तरिक्ष्य आपस्तासां विकारो धूमः। स च पुनः पृथिव्या उत्थाय आकाशे निर्वपते नैव तिर्यग्गच्छति, नार्वागारोहति, अप एव गच्छत्यान्तर्यः। आन्तरिकसम्बन्धाद् धूमः सोमरूपमादाय पृथिव्याः पुनस्तत्रैव गच्छति। धूमोऽयम् अपां रसोक्तः। अपां रसस्य यो रसः अर्थात् जलस्य यत्सारभागोऽस्ति तस्यापि सूक्ष्मरूपः सेमः सूर्ये गत्वा विद्यमानं भवति। एषापि क्रिया प्रतिदिनं भवत्येव। एवमनेन सोमतत्त्वेनादित्यः पुनः शक्तिसम्पन्नो भवति अत एव प्रतिदिनं उष्मोत्सर्जनं कुर्वन्नतिप उष्माहीनो न भवति।

आधुनिकविज्ञानानुसारं सूर्ये (९०) नवति प्रतिशतं हाइड्रोजननामकं तत्त्वमस्ति, (८) अष्टप्रतिशतं हीलियम तथा च (%२) प्रतिशतद्वयं अन्यं द्रव्यमस्ति, तदुक्तं वेदे– यदत्रोक्तम् अपां रसः तत्खलु हाइड्रोजनतत्वं ज्ञातव्यम्, अपां रसस्य यो रसः तद्रसः हिलियम् अन्यं द्रव्यं च। एभिर्द्रव्यैः सूर्यो बलवान् भवति। **''शकमयं धूममारादपश्यम् विषूवता पर एनावरेण।''**[53] एवमस्मिन् ऋग्वेदमन्त्रे ऋषिदीर्घतमसो वदति यदहमपश्यं तपोबलेन सूर्यम्परितः **'शकमयं धूमम्'** अर्थात् महाशक्तिसम्पन्न कश्चित् वाष्पदार्थो विद्यते। अन्यत्र च ऋग्वेदे एव एतत्तथ्यं वर्णितमस्ति यदिन्द्रो सूर्यस्य परिधिं परितो दृष्टवान्। यथा– **इन्द्रो रारहाण**

[50] यजु॰ ७.४२
[51] ऋ॰ १०.१९०.३
[52] यजुर्वेदे ९.३
[53] ऋ॰ १.१६४.४३

**आसां परि सूर्यस्य परिधीरपश्यत्**[54] दर्शनमेतद्योगबलादेव संभवति। एतद्दर्शनयोग्यता तु वैज्ञानिकः चमत्कार एव। सूर्यप्रकाशस्य गतिविषये यथा-"**तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य विश्वामाभासि रोचनम्**"।[55] अस्य मन्त्रस्य व्याख्यायां परमवैज्ञानिकेन सायणाचार्येणोक्तम्। यथा-

**योजनानां सहस्रे द्वे द्वे शते द्वे च योजने।**

**एकेन निर्मिषार्धेन क्रममाण नमोऽस्तुते॥ (मन्त्रव्याख्यायाम्)**

अर्थात् मन्त्रस्य व्याख्यायां हे सूर्य! तव गति अर्धनिमेषकाले द्वयोत्तरद्विशताधिकं द्विसहस्रम् (२२०२) योजनपर्यन्तमस्ति। महाभारते कालविषये एवमुक्तं महर्षिव्यासेन- "**काष्ठा निमेषा दशपञ्च चैव त्रिंशत् तु काष्ठा गणयेत् कलां तां त्रिंशत् कलाश्चापि भवेन्मुहुर्तो भागः कलायाः दशमश्च यः स्यात्। त्रिंशन्मुहुर्त्तं तु भवदेहश्च।**"[56] अर्थात् १५ निमेषस्य १ काष्ठा, ३० कलायाः १ मुहुर्तः, ३० मुहुर्त्तस्य १ अहोरात्रः सम्प्रति योजनस्य परिचयः ९ मिलपर्यन्तं मन्यते। अनेन योजनस्य परिमाणेन प्रकाशस्य गतिः "**१,८७,००० मीलं प्रति सेकण्डं**" भवति। आधुनिकविज्ञानानुसारं प्रकाशस्य गतिः **१,८६,२८१ मीलप्रतिसेकण्ड मन्यते।** एवमेव पृथिव्याः सकाशात् सूर्यसस्य स्थितिः (स्थानम्) **९,१४,००,००६** (नव कोटि चतुर्दशलक्ष षट्) मीले दूरे अस्ति। आधुनिक किलोमीटरानुसारं १४ कोटि ९६ लक्ष किलोमीटर दूरे अस्ति। अतः सूर्यकिरणाः समान्यतः ८ मिनट १० सेकण्डकाले पृथिव्यामागच्छन्ति। तद्यथा-"**अनन्ता वै सूर्याः**"। "**स एष आदित्यः एकशतविधः, तस्य रश्मयः शतंविधाः।**"[57] "**सहस्रं हैत आदित्यस्य रश्मयः**"[58] "**हरयः शता दश**"[59] अर्थात् ऋग्वेदेऽपि जैमिनीयोपनिषद्ब्राह्मणवचनस्य प्रमाणमुपलब्धम्।

सूर्यग्रहणमपि विज्ञानस्यैवैकमंशम्। ऋग्वेदे ब्राह्मग्रन्थेषु चास्य वैज्ञानिक तथ्यस्यानेकत्र वर्णनमुपलभ्यते। ऋग्वेदस्य कथनमिदमस्ति यत् स्वर्भानुः (राहुः) सूर्यं स्वकीयेनान्धकारेणाऽऽच्छादयति। पृथिवीसूर्ययोर्मध्ये चन्द्रमसः आगमने सति सूर्यग्रहणं भवति। यदुक्तं सूर्यशक्तेराधारः सोमः। तस्य सोमस्य दाताऽपि सूर्य एव। सूर्यनैव सोमरसस्यादानं नित्यं क्रियते तेनैव सोमबलेन द्यावापृथिवी अनन्त शक्तिसम्पन्नाः भवन्ति। तद्यथा- "**सोमेन पृथिवी मही**"[60] तथा च दिवि सोमो अधिश्रितः । सूर्य एव सोमतत्त्वं द्युलोकात् वृष्टिरूपेण पृथिव्यां निक्षिपति

[54] ऋ० १०.१३९.४
[55] ऋ० ८.७२.१६
[56] महा० शान्तिपर्व: २३१.१२.१३
[57] श० प० ब्रा० १०.२.४.३
[58] जै० उप० १.४४ ५
[59] ऋ० ६.४७.१८
[60] अथर्ववेद १४.१.२





पुनः पृथिवी सकाशात् सोमतत्त्वं द्युलोके निर्गच्छति इत्थं सोमस्यादानप्रदानत्वादेवायं सूर्य 'आदित्य' शब्देन विख्यातः। अत एवोक्तम्- "**अग्नीषोमात्मकं जगत्।**"[61] "**अग्नीषोमात्मकं विश्वम्**"[62] इति।

उपसमित्युपसर्गयोः पूर्वकं 'हृ' धातोः घञ् प्रत्यये कृते सति उपसंहार इति शब्दो निष्पद्यते। अतः निष्कर्षरूपेणायं वक्तुं शक्यते यत् नित्यानन्तज्ञानविज्ञानमयेषु वेदेषु विविधवैज्ञानिकरहस्यानां प्रतिपादनं कृतमस्ति। गूढार्थबोधनपुरस्सरं तत्तत्तात्त्विकचिन्तनस्य प्रकाशनमावश्यकं खलु। तेषु चिन्तनेषु विविधवैज्ञानिकाः सिद्धान्ताः प्रचुरतया वर्णिताः सन्ति। तस्मिन्नेव क्रमे **वेदेषु सूर्यविज्ञानविषयकं वैज्ञानिकं** विवेचनमत्यन्तमुपादेयत्वेन विवृतमस्ति। सूर्यः न केवलं वैदिकदेवता एवापितु महत्तत्त्वरूपेण वेदषु व्याख्यातोऽस्ति। नभोमण्डले विद्यमानानां सर्वेषामपि ग्रहोपग्रहाणां नियन्ता सूर्य एवोक्तः। सः स्वकीयेनैव बलेन भूराकाशादीन् आकर्षणशक्त्या स्तम्भितं कुर्वन् अस्ति। अयं सूर्यः परब्रह्मणः त्रिविधरूपेषु एकोऽन्यतमः। स पूर्णब्रह्मपरमेश्वरः ओङ्कारस्वरूपः वर्तते। तत्र ओङ्कारे यत् त्र्यक्षरः अ-उ-म् इति, तस्य त्र्यक्षरस्य द्योतकाः इमे अग्निवायुरवयश्च सन्ति। सूर्ये (९०) नवति प्रतिशतं हाइड्रोजननामकं तत्त्वमस्ति, (८) अष्टप्रतिशतं हीलियमद्रव्यं तथा च (%२) प्रतिशतद्वयं अन्यं द्रव्यमस्ति। यदत्रोक्तम् अपां रसः तत्खलु हाइड्रोजनतत्त्वं ज्ञातव्यम्, अपां रसस्य यो रसः तद्रसः हिलियम् अन्यं द्रव्यं च। एभिर्द्रव्यैः सूर्यो बलवान् भवति। आधुनिकविज्ञानानुसारं प्रकाशस्य गतिः **१,८६,२८१ मीलप्रतिसेकण्ड मन्यते।** एवमेव पृथिव्याः सकाशात् सूर्यस्य स्थितिः (स्थानम्) **९,१४,००,००६** (नव कोटि चतुर्दशलक्ष षट्) मीले दूरे अस्ति। आधुनिक किलोमीटरानुसारं १४ कोटि ९६ लक्ष किलोमीटर दूरे अस्ति। अतः सूर्यकिरणाः समान्यतः ८ मिनट १० सेकण्डकाले पृथिव्यामागच्छन्ति।

अतः सिद्धं भवति यत् सूर्यस्य स्वरूपेण रासायनिकतत्त्वानां सम्मिश्रणेन प्रस्तुतमस्ति। अतस्सूर्यस्य वेदेषु वर्णितानां विविधस्वरूपाणामत्र वैज्ञानिचिन्तनं मया प्रस्तुमिति। आशासे अनेन निबन्धाध्ययनेन जनाः सूर्यस्य वैज्ञानिकेन स्वरूपेणावगताः भवितव्यमीति शम्।

[61] ऋ० १०.८५.१
[62] वृ० जा० उ० २.१

सन्दर्भग्रन्थसूची

1.**अथर्ववेदसंहिता** पं.रामस्वरूपशर्मागौड:, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली-7,1990

2.**आपस्तम्बश्रौतसूत्र एक अध्ययन** आचार्य कपिलदेव शुक्ल वैशाली प्रकाशन गोरखपुर 1998

3. **ऋग्वेद:** पं. रामगोविन्दत्रिवेदी, चौखम्बाविद्याभवनम् वाराणसी 1991

4 **ऐतरेयब्राह्मणम्** सायण: नागप्रकाशक:, 11 ए.यू.ए. बंगलो रोड,जवाहर नगर, दिल्ली-7,1991

5. **कात्यायनयज्ञपद्धतिविमर्श**, डॉ. मोहनलाल द्विवेदी रा.सं.सं.नई दिल्ली 2010

6. **तैत्तिरीयसंहिता,** भट्टभाष्करमिश्र: मोतीलाल बनारसीदास, देहली 1986

7. **निरुक्तम्** यास्काचार्य: मेहरचन्दलक्ष्मणदासपब्लिकेशन्स, नवदेहली, 1999

8. **वैदिकवाङ्मयस्येतिहास:,** आचार्यजगदीशचन्द्रमिश्र: चौखम्बा सुरभारती वाराणसी 2009

8. **शतपथब्राह्मणम्** पण्डितश्रीचन्द्रशर्मा, अच्युतग्रन्थमाला कार्यालय:, वाराणसी 1994

10. **शुक्लयजुर्वेदसंहिता** पं.जगदीशलालशास्त्री,मोतीलाल बनारसीदास,देहली 1987

11.**सूर्याङ्क:** गीताप्रेस, गोरखपुर, प्रकाशित 'कल्याण' जनवरी सन् 1971

12. **श्रीमद्भगवद्गीता** जयलालगोयन्दका, गीताप्रेस, गोरखपुर वि.सं. 2067

13. **वैदिककोश:** हंसराज एवं भगवद्दत्, विश्वभारती अनुसन्धान परिषद् वाराणसी, 1992

14.**वैदिकपदानुक्रमकोश:** विश्वबन्धु: होशियारपुरम् विश्वेश्वरानन्दसंस्थानम् 1959

15. **शब्दकल्पद्रुम:** राजाराधाकान्तदेव: राष्ट्रियसंस्कृतसंस्थानम् नवदेहली, 1987





# भारते सुशासनप्रबन्धनपद्धतये संस्कृतभाषाया: योगदानम्

**डा. हीरालालदाश:**

**[सहायकाचार्य:-, श्रीचन्द्रशेखरसंस्कृतविश्वमहाविद्यालय:, एनाथुर, कांचीपुरम्, तमिलनाडु।]**

यदि सूक्ष्मातिसूक्ष्मं विचारयामस्तर्हि संस्कृतवाङ्मये शासनप्रबन्धनपद्धतिः यथा सुविस्तररूपेण वर्णिता भवति न तथाऽन्यत्र भाषायाम्। अर्थात् धर्मस्य स्वरूपं राज्ञः कर्तव्यम् अकर्तव्यश्च, चौराणां कृते दण्डः, कस्य अपराधस्य कृते कथं दण्डः, बलात्करिणां कृते दण्डः, भारतस्य च शाशनव्यवस्था च कथं भवेदिति विषयेषु संस्कृतवाङ्मये नैकेषु काव्येषु वर्णितमस्ति।

अतः संस्कृतभाषा तादृशी भवति यया भारतेऽस्मिन् सुशासनव्यवस्थां परिकल्पयितुं शक्यते तत्सर्वमपि सोदाहरणं शोधपत्रेऽस्मिन् निरूपयिष्यते|

विश्वस्मिन् अस्मिन् सर्वेषामपि राष्ट्राणां संस्कृतिः,भाषा, सभ्यता,शासनव्यवस्था च भिन्ना भिन्ना वर्तते। अस्माकं राष्ट्रं तु भारतम्। राष्ट्रेऽस्मिन् यद्यपि बहुधर्मभाषायाः जनाः निवसन्ति तथापि भारतस्य शासनव्यवस्था इतरेषां देशानामपेक्षया किञ्चित् भिन्नैव भवति। यद्यपि भारतस्य संविधाने शासनव्यवस्थायाः सुविस्तरं स्वरूपं दृश्यते, तथापि भारते बहवः जनाः सततम् अपराधं कुर्वन्ति। वयं वार्तायां प्रतिदिनं शृण्मः तथा पश्यामः यत् चौराणां गतिः, बलात्कारः, मारणम्, च्छेदनं इत्यादयः प्रचलन्ति भारते। यद्यपि दण्डव्यवस्था इदानीमपि अस्ति तथापि किमर्थं भारते एतादृशी स्थितिः परिलक्ष्यते इति कश्चन विशिष्टः प्रश्नः मनसि सदा उदेति। तत्र समाधानं इत्थं वक्तुं शक्यते यत् जनानां ज्ञानाभावः संस्कृतभाषां प्रति अनादरश्च। अत्र मम कथनस्याभिप्रायो भवति यत् भारते अस्ति कापि भाषा, या संस्कृतभाषा भवति यत्र सुशासनव्यवस्थायाः विषये नैकानि तत्थानि तत्त्वानि च वर्णितानि सन्ति। यदि भारतस्य सर्वे शासितारः तेषां परिपालनं सम्यक् करिष्यन्ति तर्हि राष्ट्रोऽयं सर्वश्रेष्ठराष्ट्ररूपेण परिगणितो भविष्यतीति नास्ति शङ्कायाः अवकाशः।

**वेदेषु प्रशासनप्रबन्धनपद्धतिः**

वेदे संस्कृते च राष्ट्रशासनपद्धति संस्कारयुक्ता धर्मानुप्रणितैव च स्वीकृता विद्यते। धर्मं विना राष्ट्रे कदापि सुशासनं नैव लभते। अत एव रामायणे " रामो विग्रहवान् धर्मः " इति वाल्मीकिना तथा महाभारते " नमो धर्माय वृहते धर्मो धारयते प्रजाः " इति व्यासेन वदता धर्मं विना प्रजायाः सम्यक् परिपालनस्य सम्भावनैव कदापि नैव स्वीकृता। संस्कृतवाङ्मये नैकेषु पद्येषु, धर्मस्य सुशासनस्य च दश सूत्राणि समीचीनानि द्रष्टुं शक्यन्ते। तानि यथा –

**सुखस्य मूलं धर्मः ।**

[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

**धर्मस्य मूलम् अर्थः ।**
**अर्थस्य मूलं राज्यम् ।**
**राज्यस्य मूलम् इन्द्रियजयः ।**
**इन्द्रियजयस्य मूलं विनयः ।**
**विनयस्य मूलं वृद्धोपसेवा ।**
**वृद्धसेवाया विज्ञानम् ।**
**विज्ञानेन आत्मानं सम्पादयेत् ।**
**सम्पादितात्मा जितात्मा भवति ।**
**जितात्मा सर्वार्थैः संयुज्यते ।**

वैदिकयुगे शासनतन्त्रस्य प्रमुखस्तु राजासीत्। परं सः निरङ्कुशः नासीत्। वैदिककाले जनैः स्वीकृत एव राजा भवितुं शक्नोति स्म। अथर्ववेदस्य बहुषु मन्त्रेषु वैदिकशासनव्यवस्थायां सभायाः समितेश्च महत्वं वर्णितं यथा –

**सर्वा विशः संमनसः सध्रीची ध्रुवाय ते समितिः कल्पतामिह।** 1

राज्ञः अयोग्यत्वं तदैव आसीत् यदा नास्मै समितिः कल्पते न मित्रं नयते वशम्।। 2

सभायाः समितेश्च सदस्या मम आनुकूल्यं भजेयुः इति एव आसीत् शासकस्य बलवती कामना प्रार्थना वा। तथाहि-

**सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने।**
**येना संगच्छा उपमा स शिक्षाच्चारु वदानि पितरः संगतेषु।।** 3

अस्य सूक्तस्य अन्यमन्त्रेषु अपि राज्ञः प्रार्थना विद्यते यत् सभासदः तस्य सवाचसः भवन्तु।

**विद्म ते समेनाम नरिष्टा नाम वा असि।**
**ये ते के च सभासदस्त मे सन्तु सवाचसः।।** 4

ऋग्वेदे अग्निरेवं सम्बोध्यते – हे अग्ने ! त्वं तीव्रगामी असि। त्वं सत्यमलीकं च ज्ञातुं शत्रून् प्रति परबाधकान् स्वप्रकानपरान् गुप्तचरान् प्रेरय। एवं केनाप्यबाधितः त्वं स्वप्रजापालकः भव। उक्तं यथा –

**प्रति स्पशो विसृशो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः।** 5

अत्र स्पश् इति शब्दस्य सम्बन्धः अग्नेः गति यः शत्रून् प्रति स्वपाशान् गुप्तचरान् परिबाधकान् वा रश्मीन् प्रेरयति। अग्निः कस्यापि राज्यस्य तेजस्वी नेताऽध्यक्षो वास्ति यः सर्वत्र गतैः स्वगुप्तचरैः सत्यासत्यं विज्ञाय प्रजाः पालयति रक्षति च। ऋग्वेदे सूर्यमपि गुप्तचरं वदति मन्त्रः। तत्र महान्तः हरणशीलाः सप्तकिरणरूपाः अश्वाः सूर्यस्य वाहकाः सन्ति। सूर्य सर्वत्र स्वप्रकाशं वितरति, सर्वं पापं पुण्यञ्च जानाति च। स्वामिदयानन्दः अत्र स्पश् अस्य शब्दस्य अर्थं दूतम् इति मन्यते। तथा सूर्यस्य प्रकाशः सर्वत्र तथैव गुप्तचराणां गतिविधयः सर्वत्र व्याप्तः भवेयुरिति अभिप्रायः। उक्तं हि



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

**तं सूर्यं हरितः सप्तवह्नीः स्पशं विश्वस्य जगतो वहन्ति।।** 6

**संस्कृतवाङ्गमये स्मृतिग्रन्थेषु शासनप्रबन्धनव्यवस्था**

संस्कृतवाङ्मये यद्यपि सन्ति नैके स्मृतिग्रन्थाः, तत्र बहुषु मन्त्रेषु श्लोकेषु वा शासनव्यवस्थायाः विषये चर्चिताः सन्ति। येषामुपरि ध्यानम् अस्माभिः सततं दातव्यमेव। स्मृतिग्रन्थेषु सर्वश्रेष्ठः भवति मनुस्मृतिः। मनुस्मृतौ बहुत्र शासनव्यवस्थायाः विषये बहवः मार्गाः निर्दिष्टाः सन्ति।

मनुस्मृतौ सप्तमाध्याये राजधर्मदण्डप्रणेत्रा कीदृशेन भवितव्यम् इत्येते विषयाः सुचर्चितास्सन्ति। तदत्र किञ्चित् प्रस्तूयते। राजा कथं भवेत् इति विषये मनुस्मृतौ उक्तं सप्तमाध्याये -

सः राजा स्वप्रभावेन अग्निः वायुः,सूर्यः,चन्द्रः,यमः(धर्मराजः),कुबेरः,वरुणः,इन्द्रश्च भवति।

अपि च उचितानुसारेण सः दण्डः दद्यात्। दण्डस्य महत्वं सुमहत् वर्तते। उक्तं यथा मनुस्मृतौ –

**दण्डः शास्ति प्रजाः सर्वा दण्डः एवाभिररक्षति।**
**दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।** 7

दण्ड एव सर्वासां प्रजानां कृते कर्तव्याकर्तव्यविषये उपदिशति, तथा दण्ड एव सर्वान् रक्षति। यदि जनाः निद्रायां भवन्ति तर्हि दण्डः तान् जागर्ति। दण्ड एव धर्मो भवतीति केषाञ्चन अभिप्रायः। यदि राजा आलस्यरहितेन दण्डप्रणयनं न करोति तर्हि शूले कृत्वा मतस्यानिव बलवन्तो दुर्बलानपक्ष्यन् खादिष्यन्ति। उक्तं हि –

**यदि न प्रणयेत् राजा दण्डं दण्ड्येष्वतन्द्रितः।**
**शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः।।** 8

मनुस्मृतौ इतोप्युक्तं यत् राजा बक इव एकाग्रचित्तेन अर्थस्य चिन्तनं कुर्यात्। सिंह इव स्वसम्पूर्णां शक्तिं संयोज्य शत्रूणां कृते आक्रमणं कुर्यात्। यथा च वृकः पालकृतरक्षणमपि पशुं दैवात् पालाऽनवधानमासाद्य व्यापादयति तथैव दुर्गाद्यवस्थितमपि रिपुं कथञ्चित् प्रमादमासाद्य व्यापादयेत्। अपि च शशकवत् समयं दृष्ट्वा शत्रोः बहिः आगच्छेत् । उक्तं यथा –

**बकवत् चिन्तयेदर्थान् सिंहवत् च पराक्रमेत्।**
**वृकवत् चाप्वलुम्पेत शशवत् च विनिष्पतेत्।।**9

एवञ्च याज्ञवल्क्यस्मृतावपि व्यवहाराध्याये दण्डपारुष्यप्रकरणे दण्डस्य स्वरूपं कीदृशस्य अपराधस्य कृते कीदृशी दण्डव्यवस्था भवेदिति सम्यक् विचारः प्रस्तुतः। यदि कश्चित् साक्षिणं विना निर्जने स्थाने कमपि

मारितवान् इति आरोपणं विदधाति तर्हि मारणस्य चिह्नं समीचीनरूपेण द्रष्टव्यमेव अथवा तानि चिह्नानि परीक्षां विधाय दण्डं दातव्यम्।यतो हि सः कृत्रमचिह्नानि विधाय मिथ्यारोपणं कुर्यात्।

दण्डपारुष्यप्रकरणे निरूपितं यत् यदि कश्चन भस्मना पङ्केन रेणुना वा अपरं स्पर्शयति तदानीं सः पुरुषः दशपणं दण्डं दाप्यः। नख-केश-कर्णस्य मालिन्य-उच्छिष्टादि अन्यत्र निक्षिप्यते तर्हि विंशतिपणः दण्डः विधातव्यः। परस्त्री तथा उत्तमव्यक्तीनामुपरि नखकेशादीनां क्षेपणे द्विगुणितं दण्डं भवति। उक्तं यथा –

**भस्मपङ्करजः स्पर्शे दण्डो दशपणः स्मृतः।**
**अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणस्ततः।।**
**समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च।**
**हीनेष्वर्धमो मोहमदादिभिरदण्डनम्।।10**

एवञ्च तत्रैव याज्ञवल्क्यस्मृतौ व्यवहाराध्याये बहुषु पद्येषु शासनप्रबन्धनविषये नीतयः निरूपिताः सन्ति। तत्सर्वमेव संस्कृतभाषायामेव असीदिति गौरवस्य विषयोऽम्।

**महाभारते शासनप्रबन्धनपद्धतिः**

रामायणं महाभारतञ्च विश्वस्य सुप्रसिद्धम् ऐतिहासिकमहाकाव्यद्वयम्। तत्र महाभारते शान्तिपर्वणि राजधर्मस्य अनेके विषयाः तथा दण्डव्यवस्थाविषये विचाराः सन्ति। यतो हि प्रजानुरञ्जनमेव राज्ञो मुख्यं कर्म। अतः सत्यस्य,धर्मस्य,तथा प्रजासु शान्तेः संस्थापनार्थं धर्मदण्डस्य विधानं नितान्तं आवश्यकम्। उक्तं यथा –

**सत्यस्य रक्षणं चैव व्यवहारस्य चार्जवम्।**
**लोकरञ्जनमेवात्र राज्ञां धर्मः सनातनः।।11**

महाभारते इतोऽपि सुसमीचीनशासनव्यवस्थायाः उदाहरणानि सहस्राधिकानि सन्ति। तथापि एकोनसप्ततितमे (69) तमे अध्याये प्रमुखरूपेण उच्यते राजाकर्तव्यविषये तथा दण्डव्यवस्थायाम् –

**सम्यग्दण्डधरो नित्यं राजा धर्ममवाप्नुयात्।**
**नृपस्य सततं दण्डः सम्यग्धर्मे प्रशश्यते।।**
**वेदवेदाङ्गवित्प्राज्ञः सुतपस्वी नृपो भवेत्।**
**दानशीलश्च सततं यज्ञशीलश्च भारत।। 12**

**संस्कृतकाव्येषु नाटकेषु च शासनप्रबन्धनव्यवस्था**

महाकविः कालिदासः रघुवंशे प्रथमसर्गे रघुवंशीयराज्ञां धर्मविषये सुसमीचीनमुदाहरणं दत्तवान्। तत्र रघुवंशीयाः सत्पात्रे दानं दातुमेव धनं स्वीकुर्वन्ति स्म। तथा च यशसे विजयमिच्छन्ति, सन्तानार्थं





विवाहं कुर्वन्ति स्म। शैशवे विद्याभ्यासं कृत्वा युवावस्थायां भोगः तथा वृद्धसमये मुनीनामिव वृत्तिः,अन्तिमे च योगेन (चित्तवृत्तनिरोधेन) शरीरं त्यजन्ति स्म। द्रष्टव्यमत्र महाराजानां स्वीयशासनव्यवस्था कथमासीत्। उक्तं यथा –

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।**
**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।**
**वार्धक्ये मुनीवृत्तीनां योगेनान्ते तनुत्यजाम्।।** 13

रघुवंशीयाः विधिपूर्वकम् अग्नौ आहुतिं दत्वा स्वेच्छानुसारं याचकानां सम्मानं कुर्वन्ति स्म। अत्र स्वेच्छानुसारं नाम याचकस्य कृते यावद्धनमपेक्ष्यते तावत् प्रयच्छन्ति स्म। तथा च उचितसमये तु सावधानाः अभुवन्। तथा यस्य यथापराधः तस्य कृते तथैव दण्डव्यवस्थापि आसीत्। अत्र भारतीयशासकानां कृते कापि प्रशासनगतशिक्षा लभते। उक्तं यथा –

**यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम्।**
**यथापराधदण्डानां यथाकालप्रबोधिनाम्।। 14**

रघुवंशे शासनव्यवस्थायाः अर्थात् एकस्य राज्ञः प्रकृतिः कथं भवेदिति विषये उक्तं वर्तते यत् –

**ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।। 15**

अभिज्ञानशाकुन्तले महाकविना कालिदासेन एकस्य राज्ञः नीतिनियमविषये कर्तव्यविषये प्रशासनविषये च सुन्दरमुदाहरणं दत्तवान्। तत्र प्रथमाङ्के दुष्यन्तः यदा दयापात्रं मृगं मारयितुं सिद्धोऽभूत् तदा वैखानसः राज्ञः कर्तव्यविषयं सूचयन् वदति यत् राज्ञः समुचितः धर्मः आर्तत्राणाय एव भवेत्, न तु निरपराधमृगान् मारणाय। अत्र द्रष्टव्यं राज्ञः उचितकर्मणः स्वरूपम्। उक्तं यथा

**तदाशु कृतसन्धानं प्रतिसंहर सायकम्।**
**आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि।।16**

राज्यशासनविषयके संस्कृतवाङ्मयं सूचयति यत् पुरा कृतयुगसमये धर्मानुसारं व्यवहारेण दण्ड्यस्यैव अभावात् नासीत् दण्डो न दाण्डिकः। पश्चात् काम-क्रोध-लोभ-मौहादिकारणात् मात्स्यन्यायप्रवर्तनात् राजशासनं दण्डेन अपराधस्य नियन्त्रणमभूत्।किन्तु धर्मानुसारं नयवर्त्मनि।तदानीं शासकः दण्डविधानं नियमपूर्वकं कुरुते स्म। एतच्च सङ्केतयति महाकविः भारविरपि किरातार्जुनीये महाकाव्ये –

**वसूनि वाञ्छन्न वशी न मन्यूना स्वधर्म इत्येव निवृत्तकारणः।**
**गुरुपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्म विप्लवम्।।17**

उत्तररामचरिते महाकविना भवभूतिना एकस्य आदर्शराज्ञः रामस्य कर्तव्यविषयं सूचयन् प्रजानां कृते राज्ञः व्यवहारं तथा प्रबन्धनपद्धतिं सुवर्णितम्।

**स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।18**

प्रजानुरञ्जनपरेण तेन केवलमेतत् कथितमेव न, अपि तु लोकरञ्जनाय लोकरक्षणाय च मूर्तिमती सत्क्रिया वसूमती सुता सीतापि तृणवत् वने त्यक्ता।

**श्रीमद्भगवद्गीतायां प्रबन्धनपद्धतिः**

श्रीमद्भगवद्गीतायां श्रीकृष्णेन शासनव्यवस्थायाः विषये भारतस्य समीचीनस्थानमवाप्तये उक्तं यत् –

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।**
**परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।19**

एवञ्च संस्कृतभाषायां रामायणमहाभारतपुराणकाव्यादिषु सर्वत्र प्रबन्धनविषये सुशासनविषये च उपदेशाः निर्दिष्टाः सन्ति।तदत्र दिङ्मात्रमुदाहृतम्।

**उपसंहारः**

संस्कृतभाषायां नैकेषु काव्येषु नाटकेषु च सुशासनव्यवस्थायाः कृते ये ये नियमाः चर्चिताः सन्ति। तेषां नियमानां समीचीनरूपेण परिपालनं यदि सम्प्रति भारतस्य शासनकर्तारः करिष्यन्ति तर्हि भारते कदापि अनीतयः नैव भविष्यन्ति। तथा च भारतस्य सर्वाः प्रजाः सततं सुखेन भविष्यन्ति।

**पादटिप्पणीः**

1. अथर्व. 6.88.3
2. अथर्व- 5. 29. 15
3. अथर्ववेद 7-12.1
11. महा. शा.प 57.11
12. महा. शा प- 69.29-30.
13. रघु. 1.7-8





4. अथर्ववेद – 7 12 – 2
5. ऋ. 4.4.3
6. ऋ. 4.13.3
7. मनु.7.18
8. मनु.7.20
9. मनु.7.106
10. याज्ञ.व्यव.श्लो.213-214 पृ-339
14. रघु.1.3
15. रघु. 1.22
16. अभि.शा 1.11
17. किरात.1.13
18. उत्तर. 1.12
19. गीता. 4.7-8

**सन्दर्भग्रन्थसूची**


1. श्रीमद्वाल्मीकि रामायण(प्रथम खण्ड), गीताप्रेसगोरखपुर, संवत् 2069
2. ईशादि नौ उपनिषद्, गीताप्रेसगोरखपुर, संवत् 2068
3. विष्णुपुराण, सम्पादक नागशरणसिंह, प्रकाशक- नाग पब्लिशर्ज़, दिल्ली-7, संस्करण – 1984
4. अथर्ववेदसंहिता पं.रामस्वरूपशर्मागौडः, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली-7,1990
5. ऋग्वेदः पं. रामगोविन्दत्रिवेदी, चौखम्बाविद्याभवनम् वाराणसी 1991
6. ऐतरेयब्राह्मणम् सायणः नागप्रकाशकः, दिल्ली-7,1991
7. शब्दकल्पद्रुमः.राधाकान्त देव बाहादुर,ओरिएंटल् बुक् सेन्टर ,दिल्ली, 2002

# अभिज्ञानशाकुन्तलम् में वात्सल्य योजना

स्वीटी रानी
[शोधच्छात्रा वेदव्यास परिसर, बलाहर, हि.प्र.]

मानव अन्तःकरण में वासना के रुप में स्थित समुद्रवत् भाव जो चिरस्थाई होते हैं एवं उपयुक्त अवसर के अनुरुप अभिव्यक्त होकर तद् तद् रुप से भिन्न् –भिन्न् रसों के रुप में दृष्टिगत् होते हैं। आचार्य भरत ने इस प्रकार स्थायी भावों की संख्या आठ निर्धारित किये हैं। वही पर परवर्ती विद्वानों ने नौ से ग्यारह तक इसकी संख्या बताई हैं। आचार्य भरत के अनुसार कुल आठ स्थायी भाव हैं वहीं पर आचार्य मम्मट स्थायीभावों की संख्या नौ बताते हैं। उनका कहना है कि निर्वेद स्थायीभाव युक्त शान्त नामक नवम रस है। आचार्य विश्वनाथ वात्सल्य को दसवें रस के रुप में स्वीकार करते हैं तथा कतिपय आचार्य भक्ति को ग्यारहवें रस के रुप में स्वीकार करते हैं। ध्यातव्य है कि छोटों के प्रति स्नेह वात्सल्य का स्थायी भाव माना गया है। वस्तुतः स्नेह रति के पर्याय के रुप में लिया जा सकता है।जो कि अन्य आचार्यों की दृष्टि में रस के रुप में स्वीकार नहीं किया गया है। किन्तु रति सन्दर्भित श्रृंगार रस कान्ता विषयक स्नेह की श्रेणी में आता है जो कि वात्सल्य और भक्ति से बिल्कुल पृथक् है। कालिदास की अनुपम कृति शाकुन्तलम् यद्यपि श्रृंगार से ओत- प्रोत है फिर भी कवि का यह वैशिष्ट्य रहा है कि अन्यान्य रसों को भी समुचित समादार दिया है। जैसा कि क्रोध, वात्सल्य आदि।
प्रस्तुत शोधपत्र में शाकुन्तलम् के उन उन स्थलों की समीक्षा की गई है जो

मानव अन्तःकरण में वासना के रुप में स्थित समुद्रवत् भाव जो चिरस्थाई होते हैं एवं उपयुक्त अवसर के अनुरुप अभिव्यक्त होकर तद् तद् रुप से भिन्न् –भिन्न् रसों के रुप में दृष्टिगत् होते हैं। आचार्य भरत ने इस प्रकार स्थायी भावों की संख्या आठ निर्धारित किये हैं। वही पर परवर्ती विद्वानों ने नौ से ग्यारह तक इसकी संख्या बताई हैं। आचार्य भरत के अनुसार कुल आठ स्थायी भाव हैं। जिन्हें हम इस रुप में देख सकते हैं –

“रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥“[63]

वहीं पर आचार्य मम्मट स्थायीभावों की संख्या नौ बताते हैं। उनका कहना है कि निर्वेद स्थायीभाव युक्त शान्त नामक नवम रस है।

“निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।“[64]

[63] काव्यप्रकाश- पृ० १३५ सूत्र ४५
[64] वहीं पृ० १३८ सूत्र ४७





आचार्य विश्वनाथ वात्सल्य को दसवें रस के रुप में स्वीकार करते हैं तथा कतिपय आचार्य भक्ति को ग्यारहवें रस के रुप में स्वीकार करते हैं।

यहाँ ध्यात्वय है कि छोटों के प्रति स्नेह वात्सल्य का स्थायी भाव माना गया है। वस्तुतः स्नेह रति के पर्याय के रुप में लिया जा सकता है।जो कि अन्य आचार्यों की दृष्टि में रस के रुप में स्वीकार नहीं किया गया है। किन्तु रति सन्दर्भित श्रृंगार रस कान्ता विषयक स्नेह की श्रेणी में आता है जो कि वात्सल्य और भक्ति से बिल्कुल पृथक् है।

कालिदास की अनुपम कृति शाकुन्तलम् यद्यपि श्रृंगार से ओत- प्रोत है फिर भी कवि का यह वैशिष्ट्य रहा है कि अन्यान्य रसों को भी समुचित समादार दिया है। जैसा कि क्रोध, वात्सल्य आदि।

प्रस्तुत शोधपत्र में शाकुन्तलम् के उन उन स्थलों की समीक्षा की गई है जो वात्सल्य से ओत- प्रोत है। जैसे कि –

१. जब दुष्यन्त शकुन्तला की सखियों से शकुन्तला के विषय में पूछते हैं वहाँ आचार्य कण्व में वात्सल्य की अनुपम छवि मिलती है। शकुन्तला अपने माता- पिता के परित्यक्ता होकर जब आचार्य कण्व की दृष्टि में आती है तब कण्व की वात्सल्य अभिव्यक्ति और उसे माता गौतमी की देख- रेख में आश्रम में रख लेते हैं। इतना ही नहीं जैसे एक पिता अपनी पुत्री के लिये उसके हित- अहित का चिन्तन करता है। उसी तरह आचार्य कण्व भी उसके हित – अहित का ध्यान देते हुए प्रतीत होते हैं।

राजा - भगवान्काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत्?
अनसूया – श्रृणोत्वार्यः। अस्ति कोऽपि कौशिक इति गोत्रनामधेयो महाप्रभावो राजर्षिः।
राजा - अस्ति। श्रूयते।
अनसूया - तमावयोः प्रियसख्याः प्रभवमवगच्छ। तेन उज्झितायाः शरीर-संवर्धनादिभिस्तातकाश्यपोऽस्याः पिता।
राजा - उज्झितशब्देन जनितं मे कौतूहलम्! आमूलात् श्रोतुमिच्छामि।
अनसूया - श्रृणोत्वार्यः। गौतमीतीरे पुरा किल तस्य राजर्षेः उग्रे तपसि वर्तमानस्य किमपि जातशङ्कैर्देवैर्मेनका नामाप्सराः प्रेषितानियमविघ्नकारिणी।
राजा - अस्त्येतदन्यसमाधि भीरुत्वं देवानाम्।
अनसूया - ततो वसन्तोदार - (वसन्तावतार)-समये तस्या उन्मादयितृ रुपं प्रेक्ष्य......... (इत्यर्धोक्ते लज्जया विरमति)
राजा - परस्ताज्ज्ञायत एव। सर्वथाप्सरसंभवैषा।
अनसूया - अथ किम्?
राजा - उपपद्यते।
मानुषीषु कथं वा स्यादस्य रुपस्य संभवः
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥२३॥
(शकुन्तलाधोमुखी तिष्ठति)[65]

[65] शाकुन्तलम्- १०४-१०६

२. शकुन्तला के प्रतिकूल भाग्य को अनुकूल करने के लिये सोमतीर्थ जाते हैं। यहाँ पर ऋषि कण्व वीतरागी ऋषि न होकर एक आदर्श पिता के रुप में दृष्टिगत होते है।

राजा - अपि सन्निहितोऽत्र कुलपतिः ?
वैखानसः- इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय नियुज्य दैवमस्याः
प्रतिकूलं शमयितुं सोमतीर्थं गतः।
राजा - भवतु। तामेव द्रक्ष्यामि। सा खलु विदितभक्तिं मां महर्षेः
कथयिष्यति।[66]

३. जब शकुन्तला कामज्वर से पीडित रहती है। तब गौतमी द्वारा अपनी पुत्री शकुन्तला का ध्यान रखना वात्सल्य का एक अनुपम उदाहरण है।

(ततः प्रविशति पात्रहस्ता गौतमी सख्यौ च )
सख्यौ- इत इत आर्या गौतमी।
गौतमी- (शकुन्तलामुपेत्य )जाने, अपि लघुसन्तापानि तेऽङ्गानि ?
शकुन्तला-आर्ये, अस्ति मे विशेषः।
गौतमी- अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति। (अभ्युक्ष्य)
वत्से, परिणतो दिवसः। एहि। उटजमेव गच्छामः। (प्रस्थिताः)
शकुन्तला- (आत्मगतम्) हृदय, प्रथममेव सुखोपनते मनोरथे कातरभावं न
मुञ्चसि। सानुशयविघटितस्य कथं ते सम्प्रतं सन्तापः ? (पदान्तरे
स्थित्वा, प्रकाशम्) लतावलय, सन्तापहारक, आमन्त्रये त्वां
भूयोऽपि परिभोगाय।
(इति दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः)[67]

४. शकुन्तला का जीव – जन्तुओं के प्रति पेड- पौधों के प्रति जो स्नेह परिलक्षित होता है वह भी वात्सल्य का उत्तम उदाहरण है। जहाँ पर शकुन्तला की विदाई के समय मोर मृगशावक आदि के द्वारा रास्ता रोका जाना आदि वात्सल्य भाव को दर्शाता है।

५. चतुर्थ अंक जब शकुन्तला ससुराल जाने लगती है उस समय आचार्य कण्व एक आदर्श पिता के रुप में जाने जाते है। किसी पिता के लिए उसके वात्सल्य का सर्वाधिक निदर्शन उसके सन्तान के भविष्य नियोजन में दृष्टिगत होता है। शकुन्तला अपने पतिगृह जा रही है। शकुन्तला का अपने पतिगृह में किस तरह का स्थान प्राप्त होगा, उसके प्रति क्या भाव रहेगा। शकुन्तला को पतिगृह के लोगों के साथ किस प्रकार का व्यवहार करना होगा। शकुन्तला किस तरह गृहणी पद को प्राप्त करेगी।ये सभी भगवान कण्व ने एक आदर्श पिता के भाँति चिन्तन कर शकुन्तला के प्रति साथ ही दुष्यन्त के प्रति अपने उदगार को व्यक्त करते है।

---

66 शाकुन्तलम्- ९२-९४

67 शाकुन्तलम् पृ० १५०





शुश्रुषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने;
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी;
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।[68]

६. पुत्री की विदाई के समय वात्सल्य के कारण एक पिता की जो स्थिति होती है। कालिदास ने उस रीति का सम्यक् रुप से निर्वहण किया है।

यास्यत्यद्य शकुंतलेति हृदयं संस्पृष्टमुत्कंठया
कंठः स्तम्भित बाष्पवृत्तिकलुषः चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनया विश्लेष दुःखैर्नवैः॥[69]

अर्थो हि कन्या परकीय एव तामध्य संप्रेष्य परिग्रहीतुः।
जाते मामायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥[70]

७. शकुन्तला के प्रत्याख्यान के बाद दुष्यन्त चिन्तित रहता है। विशेषरुप से जब एक वणिक् के सन्दर्भ में न्याय की बात आती है वह सोचता है कि उसके मरने के बाद उसका राज्य का क्या होगा। इस स्थल पर भी वात्सल्य छवि दृष्टिगत होती है।

राजा- किमनेन सन्ततिरस्ति नास्तीति ?
येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥२३॥
प्रतीहारी – एवं नाम घोषयितव्यम् (निष्क्रम्य पुनः प्रविश्य) काले
प्रवृष्टमिवाभिनन्दितं देवस्य शासनम्।
राजा-(दीर्घमुष्णं च निः श्वस्य) एवं भो। सन्ततिच्छेदनिरवलम्बना
कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठन्ति। ममाप्यन्ते
पुरुवंशश्रियः एष एव वृत्तान्तः।
प्रतीहारी – प्रतिहतममङ्गलम्।
राजा- धिङ्मामुपस्थितश्रेयोवमानिनम्।
सानुमती – असंशयं सखीमेव हृदये कृत्वा निन्दितोऽनेनात्मा।
राजा- संरोपितोऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।
कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा॥२४॥
सानुमती – अपरिच्छिन्नेदानीं ते सन्ततिर्भविष्यति।

---

68 शाकुन्तलम् पृ० १७८

69 शाकुन्तलम् पृ० १६६

70 शाकुन्तलम् पृ० १८२

चतुरिका – आर्य, अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगो भर्ता । एनमाश्वासयितुं
मेघप्रतिच्छन्दादार्यं माधव्य गृहीत्वागच्छ ।
प्रतीहारी – सुष्ठु भणसि ।[71]

८. सप्तम अंक में जब दुष्यन्त भरत को देखता है तो उस सर्वदमन की बातों को सुनकर वात्सल्य विशेषरुप से अपनी पराकाष्ठा को प्राप्त करता है और यही वात्सल्य नाटक में चरम परिणति का कारण बनता है ।

बालः - मातः, रोचते म एष भद्रमयूरः (इति क्रीडनकमादत्ते)
प्रथमा- (विलोक्य सोद्वेगम्) अहो । रक्षाकरण्डकमस्य मणिबन्धे न दृश्यते ।
राजा- अलमावेगेन – नन्विदमस्य सिंहशावविमर्दात्परिभ्रष्टम् ।
(इत्यादातुमिच्छति )
उभे- मा खल्वेतदवलम्ब्य--- कथं गृहीतमनेन !
(इति विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः)
राजा- किमर्थं प्रतिषिध्दाः स्मः ?
प्रथमा - श्रृणोतु महाराजः । एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एनां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति ।
राजा- अथ गृह्णाति ?
प्रथमा- ततस्तं सर्पो भूत्वा दशति ।
राजा- भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ?
उभे- अनेकशः ।
राजा - सहर्षम् , (आत्मगतम्) कथमिव सम्पूर्णमपि मे मनोरथं नाभिनन्दामि ! (इति बालं परिष्वजते)
द्वितीया- सुव्रते, एहि । इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः । (इति निष्क्रान्ते)
बालः- मुञ्च माम् । यावन्मातुः सकाशं गमिष्यामि ।
राजा- पुत्रक, मया सहेव मातरमभिनन्दिष्यसि ।
बालः - मम खलु तातो दुष्यन्तः ! न त्वम् ।
राजा -(सस्मितम्) एष विवाद एव प्रत्याययति !
(ततः प्रविशत्येकवेणीधरा शकुन्तला)
शाकुन्तला – (पाश्चात्तापविवर्णं राजानं दृष्ट्वा) न खल्वार्यपुत्र इव । ततः
क एष इदानीं कृतरक्षामङ्कलं दारकं मे गात्रसंसर्गेण दूषयति ?
बालः- (मातरमुपेत्य) मातः एप कोऽपि पुरुषो मां पुत्र इति आलिङ्गति ।

[71] शाकुन्तलम् २४०-२४२



[A First International Electronic Peer-reviewed Quarterly Refreed UGC Approved Sanskrit Tri-lingual Journal] ISSN 0976-8645
Available at- www.jahnavisanskritejournal.in Issue-29th, Year 07, Vol -II, Date-21/05/17

राजा- प्रिये, क्रौर्यमपि मे त्वयि प्रयुक्तमनुकूलपरिणामं संवृत्तं,
यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।[72]

यद्यपि मम्मटादि आचार्यों ने वात्सल्य की चर्चा नहीं की है किन्तु रति से अतिरिक्त स्नेह रुप स्थायीभाव का अपना माहत्व है । यह वात्सल्य न केवल कालिदास आदि के काव्यों में अपितु आदिकवि वाल्मीकि रचित बालकाण्ड में इसके साथ ही अन्यान्य पुराणों में विशेषरुप से दृष्टिगत होता है । व्यवहारिक जीवन में भी दाम्पत्य के सम्भोग श्रृंगार की परिणिति एवं रक्षण वस्तुतः वात्सल्य के आधार पर ही आकर टिकता है जैसा कि उत्तररामचरितम् में अपत्य की परिभाषा इस रुप में दी गई है स्नेहग्रन्थिरित्येषः अपत्य इति कथ्यते । इस प्रकार से वात्सल्य विवेचन की दृष्टि में आदर्श पिता के रुप में दुष्यन्त महनीय हैं एक आदर्श पति की अपेक्षा । इसी प्रकार भगवान् कण्व आदर्श पिता के रुप में विशेष दृष्टिगत होते हैं ।

**सन्दर्भग्रन्थसूची**


- शास्त्री, डा. राकेश, अभिज्ञानशाकुन्तलम्, दिल्लीः संस्कृत ग्रन्थागार, विक्रम संवत्- २०६१.
- त्रिवेदी, भवानी शङ्करः, संस्कार प्रकाश,श्री लाल वाहादुर शास्त्री राष्ट्रीय संस्कृत विद्यापीठ, दिल्ली,२००९
- काणे, पि.भि., धर्मशास्त्र का इतिहास (पञ्चमभाग),उत्तरप्रदेश हिन्दी संस्थान, लखनऊ,१९९५
- शब्दकल्पद्रुमः.राधाकान्त देव बाहादुर,ओरिएंटल् बुक् सेन्टर ,दिल्ली, 2002


[72] शाकुन्तलम् २६४-२६८

# ब्रह्मपुराणे भगवान् जगन्नाथः

डा. मखलेशकुमारः
[सहाचार्यः, पुराणेतिहासविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि), श्रीसदाशिवपुरीपरिसरः, पुरी]

अस्माकं संस्कृतिः वेदसाहित्यादेव समारभ्यते, अत एव वेदाः सृष्टेरादिकालतः एव मार्गप्रदर्शकाःसन्ति। वेदाः धर्मस्य मूलत्वेन अभिमताः। वेदोऽखिलो धर्ममूलमिति। भारतीयधर्मदर्शनस्य स्रोतभूतस्य वेदस्य स्थानमप्रतिमं विद्यते। लौकिकःपारलौकिकः वा कोऽपि विषयःएतादृशःनास्ति यस्य प्रतिपादनं वेदेषु नास्ति। अत एव वक्तुं शक्यते यत् प्रायःसर्वे विषयाःबीजरूपेण वेदे उपनिवद्धाः। वेदस्य भाषा प्राञ्जला,शैली,प्रतीकमयी, विषयप्रतिपादनं परोक्षरूपेण च वर्तते। एवम्भूतस्य वेदस्य अध्ययने समेषामधिकारःअपि नास्ति। एतत्सर्वमभिलक्ष्य भगवता वेदव्यासेन वेदोपबृह्मकानां पुराणानां रचना कृतम्। पुराणेषु वैदिकसाहित्ये वर्णितस्य विषयस्य सरसशैल्या आख्यानोपाख्यानमाध्यमेन प्रकाशनं कृतम्। वेदोपनिषत्सु निष्णातः अपि मनुष्यः पुराणज्ञानाभावेन विचक्षणः भवितुं नार्हति।

वेदोऽखिलो धर्ममूलमिति। भारतीयधर्मदर्शनस्य स्रोतभूतस्य वेदस्य स्थानमप्रतिमं विद्यते। लौकिकःपारलौकिकः वा कोऽपि विषयःएतादृशःनास्ति यस्य प्रतिपादनं वेदेषु नास्ति। अत एव वक्तुं शक्यते यत् प्रायःसर्वे विषयाःबीजरूपेण वेदे उपनिवद्धाः। वेदस्य भाषा प्राञ्जला,शैली,प्रतीकमयी, विषयप्रतिपादनं परोक्षरूपेण च वर्तते। एवम्भूतस्य वेदस्य अध्ययने समेषामधिकारःअपि नास्ति। एतत्सर्वमभिलक्ष्य भगवता वेदव्यासेन वेदोपबृह्मकानां पुराणानां रचना कृतम्। पुराणेषु वैदिकसाहित्ये वर्णितस्य विषयस्य सरसशैल्या आख्यानोपाख्यानमाध्यमेन प्रकाशनं कृतम्। वेदोपनिषत्सु निष्णातः अपि मनुष्यः पुराणज्ञानाभावेन विचक्षणः भवितुं नार्हति। यथा–

**यो विद्यात्चतुरो वेदान् साङ्गोपनिषदो द्विजः।**
**न चेत्पुराणं सविद्यान्नैव स स्याद्विचक्षणः।।** [७३]

पुराणवाङ्मये ब्रह्मपुराणस्य स्थानं महत्त्वपूर्णं विद्यते। एतस्य पुराणस्य भागद्वयं वर्तते–पूर्वभागः,उत्तरभागश्च। तत्र पूर्वभागे५७,उत्तरभागे च १८८मिलित्वा२४५अध्यायाःसन्ति।अस्य पुराणस्याध्ययनेन सकलपापनिवृत्तिःसर्वविधसुखस्य प्राप्तिश्च सम्भवति। नाम्ना पुराणमिदं ब्रह्ममाहात्म्यसूचकं प्रतीयते, परन्तु स्वयं ब्रह्मपुराणमात्मानं वैष्णवपुराणं कथयति। तद्यथा–

**पुराणं वैष्णवं त्वेतद् सर्वकिल्विषनाशनम्।**
**विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपपादकः।।**

विष्णु–नारदीय–भागवतादिपुराणानुसारं ब्रह्मपुराणमादिपुराणत्वेन स्वीकृतमिति।यथा–

[73] प०पु०सृ०ख०२-५१





**आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते।**
**अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते।** [७४]

निगुर्णस्य निराकारस्य ब्रह्मणः स्वरूपं वेदोपनिषत्सु बहुधा प्रतिपादितम्। तत्रनिरूपितस्य ब्रह्मणःपादौ हस्तौ न स्तः,तथापि सः वेगेन गन्तुं गृहीतुं च शक्नोति। तथा च अकर्णः सन् श्रृणोति,अचक्षुः सन पश्यति च। परन्तु वेदादिषु बहुविवेचितस्य निर्गुणनिराकारस्य ब्रह्मणः रामकृष्णादिरुपेण सगुणसाकारस्वरुपं पुराणेषु स्पष्टीकृतम्। सगुणसाकारस्वरुपे परमेश्वरे मनः संयोज्य साधारणजनाःअपि संसारसागरात् तरन्ति। पुरुषोत्तमस्य जगन्नाथस्य स्वरुपं वैदिकसाहित्येऽपि किञ्चिद वर्णितम्, तत्रापि दारुमय्याः मूर्त्ते प्रतिपादनमिति। तद्यथा–

**अदो यद् दारु प्लवते सिन्धोः पारे अपूरुषम्।**
**तदालभस्व दुर्हाणो तेन याहि परस्तरम्।।**[७५]

वेदभाष्यकारः सायणाचार्यःअस्य मन्त्रस्य भाष्ये लिखति–दारुनिर्मात्रा पुरुषेण सहितम्(अपूरुषम्) पुरुषोत्तमाख्यं देवता शरीरं सिन्धोः पारे प्लवते,तदारभस्व, हे दुर्हाणो! हे स्तोतः! तेन दारुमयेन देवेन,उपास्यमानेन परस्तरं याहि, उत्कृष्टं वैष्णवं लोकं गच्छेति। अथर्ववेदेऽपि उपर्युक्तार्थः एव प्रतिपादितः। तद्यथा–

**आदौ यद्दारु प्लवते सिन्धोर्मध्येऽपूरुषम्।**
**तदालभस्व दुर्दूनो तेन याहि परस्थलम्।।**[७६]

एवं (अपूरुषम्) पुरुषोत्तमाख्यंदेवता शरीरं यत् सिन्धोः पारे प्लवतेत्यादिना वेदे वर्णितस्य दारुमयस्वरूपस्य ब्रह्मणः विशदं ज्ञानं पुराणेषु बहुचर्चितस्य जगन्नाथस्य स्वरूपेण भवति।यथा–

**अहो तवायं खलु भाग्यराशिः**
**येन विरासीद्भुवि दारुमूर्तिः।**
**यस्यात्युपास्तिं श्रुतिराह मुक्ति–**
**प्रदामनात्मज्ञविमोहितानाम्।।**

**य एष प्लवते दारु सिन्धोः पारे ह्यपौरुषम्।**
**तमुपास्य दुराराध्यं मुक्तिं यान्ति सुदुर्लभाम्।** [७७]

वेदेषु ‘‘सिन्धोःपारे‘‘यत् कथितं तेन पुरुषोत्तमक्षेत्रस्य एव प्रत्याख्यानमिति। ब्रह्मपुराणे समुद्रस्योत्तरतीरस्थमेतद् क्षेत्रं मुक्तिदं सर्वकामदं पवित्रं वालुकाकीर्णं दशयोजनविस्तीर्णं पञ्चयोजनमायतं परं गुह्यञ्च समुपस्थापितम्।यथा–

**समुद्रस्योत्तरे तीरे तस्मिन्देशे द्विजोत्तमाः।**
**आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम्।।**

[74] वि.पु.३-६-२०
[75] ऋग्वेदे.१०-१५५-०३
[76] अथर्ववेदे.६-८-७
[77] स्क.पु.-पु.क्षे.मा.२१-२,३

**सर्वत्रवालुकाकीर्णं पवित्रं सर्वकामदम्।**
**दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम्।।**[७८]

दिक्क्रमेणोत्कलक्षेत्रस्य मर्यादा यावत् पर्यन्तं विद्यते,तावत् भगवत:श्रीकृष्णस्य कृपया एषः देशः पुण्यतमः स्मृतः। एवञ्च अस्मिन् देशे विश्वात्मा जगद्वयापी जगन्नाथः पुरुषोत्तम:ब्रह्माद्यै:सर्वैः देवै:सह विराजते–

**एवं सर्वगुणोपेतं क्षेत्रं परमदुर्लभम्।**
**आस्ते तत्र मुनिश्रेष्ठा विख्यातः पुरुषोत्तमः।।**
**यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्तिता।**
**तावत्कृष्णप्रसादेन देशः पुण्यतमो हि सः।।**
**यत्र तिष्ठति विश्वात्मा देशे स पुरुषोत्तमः।**
**जगद्वयापी जगन्नाथस्तत्र सर्वं प्रतिष्ठितम्।।**
**अहं रुद्रश्च शक्रश्च देवश्चाग्निपुरोगमाः।**
**निवसामो मुनिश्रेष्ठास्तस्मिन्देशे सदा वयम्।** [७९]

एतस्मिन् पुरुषोत्तमे क्षेत्रे पुरुषोत्तमः जगन्नाथः आदिकालादेव शोभते। मर्त्याः विवुधप्रख्याः सन् समुद्रजले स्नात्त्वा पुरुषोत्तमस्य जगन्नाथस्य दर्शनं कुर्वन्ति,अतः एते जना:पुण्यं सम्पाद्य कदाचिदपि यमालयं न पश्यन्ति। एवम्भूतानां पुरुषोत्तमक्षेत्रनिवासिनां मानवानां जीवनं धन्यमिति।उक्तञ्च–

**आस्ते यत्र स्वयं देवो मुक्तिदः पुरुषोत्तमः।**
**धन्यास्ते विबुधप्रख्या ये वसन्त्युत्कले नराः।।**
**तीर्थराजजले स्नात्त्वा पश्यन्ति पुरुषोत्तमे।**
**स्वर्गे वसन्ति ते मर्त्या न ते यान्ति यमालये।।**
**ये वसन्त्युत्कले क्षेत्रे पुण्ये श्रीपुरुषोत्तमे।**
**सफलं जीवितं तेषामुत्कलानां सुमेधसाम्।।**[८०]

पुराकाले उज्जयिन्यां मतिमान् भक्तिमान् राजा इन्द्रद्युम्नः जातः। एकदा तस्य मनसि बुद्धिरियं समुत्पन्ना यत् भुक्तिमुक्तिप्रदं प्रभुं कथमाराधयिष्यामि इति। तदा महज्जनै:आवृतः सपुरोहितः सः नृपतिः स्वपुरात् विनिष्क्रान्त:सन् दक्षिणस्योदधेस्तीरे जगाम। तत्र गत्त्वा तेन दशयोजनविस्तीर्णं पञ्चयोजनमायतं त्रैलोक्यपूजितं परं दुर्लभं क्षेत्रं दृष्टम्–

**दशयोजनविस्तीर्णं पञ्चयोजनमायतम्।**
**नानाश्चर्यसमायुक्तं क्षेत्रं परं दुर्लभम्।।**[८१]

---

[78] ब्र.पु.४२-१३,१४
[79] ब्र.पु.४२-३४तः३८
[80] ब्र.पु.४२-४४तः४६
[81] ब्र.पु.४४-७९





एवं भिक्षुभि:वैखानसैः सिद्धैः स्नातकैः ब्रह्मचारिभिः तपसिद्धैः यज्ञसिद्धैः निषेवितं परं शोभनं क्षेत्रं दृष्ट्वा सनातनं भगवन्तं अत्रैव आराधयिष्यामीति नृपतिः निश्चितवान् –

**भिक्षुवैखानसैः सिद्धैः स्नातकैर्ब्रह्मचारिभिः ।**
**मन्त्रसिद्धैस्तपः सिद्धैर्यज्ञसिद्धैर्निषेवितम् ।।**
**इत्येवं ददृशे राजा क्षेत्रं परमशोभनम् ।**
**अत्रैवाऽऽराधयिष्यामि भगवन्तं सनातनम् ।।**[८२]

पुरुषोत्तमक्षेत्रमिदं तस्य भगवतः मानसं तीर्थं इति चिन्तयन् राजा भगवतः साक्षात्कारार्थं यज्ञदानतपोभिः होमैः ध्यानैः उपवासैश्च विधिवत् उत्तमं व्रतम् आचरति, तथा च वाजिमेधस्य विष्णवायतनविन्यासस्य सङ्कल्पं चादधति । कालेन मखं परिसमाप्य वैष्णवं प्रासादं च निर्मीय प्रतिमार्थं तस्य राज्ञः चिन्ता बभूव –

**प्रवृत्ते च महायज्ञे प्रासादे चैव निर्मिते ।**
**चिन्ता तस्य बभूवाथ प्रतिमार्थमहर्निशम् ।।**[८३]

तदा देवविग्रहनिर्माणं चिन्तयन् स भूपालः इन्द्रद्युम्नः पाञ्चरात्रविधानेन पुरुषोत्तमं सम्पूज्य स्तुतिं कृत्वा भूतले कुशान् आस्तीर्य सुस्वाप , तदा तं राजानं प्रसन्नः वासुदेवः शङ्खचक्रगदाभृतमात्मानं सन्दर्शयामास । अनेन मखेन तुष्टोऽस्मि इत्युक्तवा विग्रहप्राप्त्युपायमपि तेन निगदितम्–

**गतायामद्य शर्वर्यां निर्मले भास्करोदिते।**
**सागरस्य जलस्यान्ते नानाद्रुमविभूषिते ।।**
**जलं तथैव वेलायां दृश्यते तत्र वै महत्।**
**लवणस्योदधे राजंस्तरङ्गैः समभिप्लुतम् ।।**
**कूलान्ते हि महावृक्षः स्थितःस्थलजलेषु च।**
**वेलाभिर्हन्यमानश्च न चासौ कम्पते द्रुमः।।**
**परशुमादाय हस्तेन ऊर्मेरन्तस्ततो व्रज ।**
**एकाकी विहरन्राजन्स त्वं पश्यसि पादपम्।।**
**ईदृक्चिह्नं समालोक्य छेदय त्वमशङ्कितः ।**
**छेद्यमानं तु तं वृक्षं प्रातरद्भुतदर्शनम्।।**
**दृष्ट्वा तेनैव संचिन्त्य ततो भूपालदर्शनात्।**
**कुरु तां प्रतिमां दिव्यां जहि चिन्तां विमोहिनीम् ।।**[८४]

एवं भगवतादेशेन स राजा प्रगतायां रजन्याम् उत्थितः सन् सागरे स्नात्त्वा विधिपूर्वकं विप्रेभ्यः दानं दत्त्वा पौर्वाह्निकं कर्म सम्पादयित्त्वा एकाकी एव महोदधेः महावेलायां समागत्य महावृक्षं सन्ददर्श। तत्र भगवता सूचितं महावृक्षं दृष्ट्वा मुदान्वितः राजा परशुना शातयामास । तदा तत्र विश्वकर्मा विष्णुश्च विप्ररूपधरौ सन् आजग्मतुः । द्रुमः कथं शातितः इति तौ राजानं पृष्टवन्तौ , तदा इन्द्रद्युम्नेन विग्रहनिर्माणसम्वद्धं वृत्तं सर्वं श्रावितम्। तच्छुत्त्वा प्रसन्नः भगवान् विष्णुः भूपतिं शीतलवृक्षच्छायायां समानीय मूर्तिरचनार्थं विश्वकर्माणं निर्दिष्टवान् । तद्यथा –

**तस्थौ स नृपतिश्रेष्ठो वृक्षच्छाये सुशीतले ।**
**ततस्तस्मै स विश्वात्मा ददावाज्ञां द्विजाकृतिः ।।**

---

[82] ब्र.पु.४६-२३,२४
[83] ब्र.पु.४९-४
[84] ब्र .पु.५०-१०तः१५

**शिल्पिमुख्याय विप्रेन्द्रा कुरुष्व प्रतिमा इति ।**
**कृष्णरुपं परं शान्तं पद्मपत्रायतेक्षणम् ।।**
**श्रीवत्सकौस्तुभधरं शङ्खचक्रगदाधरम् ।**
**गौराङ्गक्षीरवर्णाभं द्वितीयं स्वास्तिकाङ्कितम् ।।**
**लाङ्गलास्त्रधरं देवमनन्ताख्यं महाबलम् ।**
**देवदानवगन्धर्वयक्षविद्याधरोरगै: ।।**
**न विज्ञातो हि तस्यान्तस्तेनानन्त इति स्मृत:।**
**भगिनीं वासुदेवस्य रुक्मवर्णां सुशोभनाम् ।।**
**तृतीयां वै सुभद्रां च सर्वलक्षणलक्षिताम् ।[85]**

विष्णो: वच: श्रुत्वा विश्वकर्मा एकेन क्षणेन प्रथमं शुक्लवर्णाभं शारदेन्दुसमप्रभं , द्वितीयं पुण्डरीकाक्षं नीलजीमूतसन्निभं, तृतीयां स्वर्णवर्णाभां पद्मपत्रायतेक्षणां दारूमयीं प्रतिमां रचयामास । क्षणेनैकेन सर्वलक्षणसम्पन्ना: विनिर्मिता: सुशोभना: प्रतिमा: विलोक्य नृप: तौ शरणं गच्छति, तदा भगवान् विष्णु: आत्मानं पुरुषोत्तमं इति समुद्घोषयति–

**नाहं देवो न यक्षो वा न दैत्यो न च देवराट् ।**
